णनासायां हृवीरसासेवनेविनियोगः॥ अथवंतः तस्यारसेन सूर्व
८७ वनुपनिष्टायांदक्षिणास्मिन्नासायां विलेरव्यचैवतस्याः सुप्तस्त्रि ९७
न्। दक्षींमेवसंसीचतीति। शौनकोपि। गत्यं त्वेन्द्रकोष्ठियायांस्थित्वछन्ने द
क्षिणे नासिकेत्र्त्वा तथा हृवीरसं सिंचेद्यथा तो दरगतं न वेदितिं॥ अद

सेउदरंगनेतामाचमय्य। अग्निसमीपमागत्य सर्वं वस्त्रपविश्यावदार
धर्मेण वरुमवद्दायव ध्यास्पृष्ट्वा: प्रजापतये स्वाहेत्येकामाहुतिं हुत्वाप
त्न्याहृदयं स्पृष्ट्वा यत्ते सुसीमइतिमंत्रेण। यत्ते सुसीमइतिमंत्रस्य हि
रण्यगर्भप्रजापतिरनुष्टुप्। भार्याहृदयालंभने विनियोगः। ततस्विष्ट
कृदादिसमापयेत्।। कारिका।। अन्येत्वाहुरिदं कर्म होतव्यं स्यात्प्रतिम
ऽले। इदं कर्म गर्भसंस्कारत्वात्प्रतिगर्भं प्रचक्षते। गर्भे तृतीये मे कार्यमि
तिकेचित्प्रचक्षते। अस्माकं तु पतिर्देवरो वा नवेत्। पुंसवनस्यमास
तिकेचि ... प्राधान्येनविहितत्वात्। गुरुणाकर्मा। ह्यपिकर्तव्यतागम्यते। नदोष
ह संपातिः।। मासस्य गुरुः कार्यो गुरुस्त्वं गुरुरेव कयोः। नदोषहातदामासं

त्वणो बलवानिति॥ ७॥ इति पुंसवनं॥ ७॥ अथ सीमंतोन्नय
नं॥ सीमंत उन्नीयते यस्मिंश्च कर्मणि तत्सीमंतोन्नयनं॥ तच्च चतुर्थे ग
र्भमासे षष्ठेऽष्टमयोर्वा कार्यं। षष्ठाष्टमयोरित्ययं कालोऽथशब्दे
१२ न सूचितः। कथं॥ अथाग्निमुपसमाधायेति सूत्रे। अथशब्दोऽन्य
स्मिन्नपि काले वर्त्तीदं कर्मेति ज्ञापनार्थं॥ इति नारायणः॥ शौनकः।
चतुर्थे गर्भमासस्य। सीमंतोन्नयनक्रिया। षष्ठेऽष्टमेव कुर्वी
त चांतरविधानतः। अभावे सर्वस्य विदधीत चरोत्तरे। आचि
आधानादष्टमे मासि सीमंतोन्नयनं भवेत्। नवमे मासि वाऽक

र्भो घावकर्मविमोचनं। सीमंतोन्नयनं कार्यमादित्ये गुरुसौमयोः। ए
गोष्ठपुनर्वसौ पुष्ये हस्ते मूले च वैष्णवे। मृन्ना। मभावण स्त्रिष्यो हस्ते
वसुनर्वसुः। अभिजित्स्वाष्ट्र पौष्णे च अनुराधोत्तरास्वथ सुक्रे। मेषमिथुनसं
हे तुला धनकुंभेषु। एतानि लग्नानि सुः। अरक्षस्य मध्यमे पाद द्वयेक मे
दमिष्यते। श्राग्नीवर्मदूर्ध्वे लोमस्यात्स्व यणनं तु हानि नमिति॥ अथ प्र
योगः॥ ॥अस्या भार्यायाः प्रतिगर्भमति श्राय्यार्थं बैजिक गार्भिक
दोषपरिहारार्थं च सीमंतोन्नयनं करिष्ये। तदंगत्वेन स्वस्ति पुण्या
हवाचनं नांदीमुखश्राद्धं च करिष्ये। अथापरेद्युः मंगलाचारायुनाम
ल्हातामुत्कस्थ स्वयानां पत्नीं संनिधाप्य पुनः संकल्पमुख्वा गणेशा

ग्नौ सीमंतोन्नयनहोमे न्वाधानं करिष्य इत्यादि वक्ष्यं तत्कृत्वादिवा
रं धातारं राकां च त्रिवारं लिंगोक्तदेवतां प्रजापतिं चाज्य द्रव्येण शेषेण
स्विष्टकृतमग्निमित्यादि समिल्लक्षेपणांतमन्वाधानं कृत्वा पायसा
११ दनं कुर्यात् ॥ तत्र क्रमः ॥ प्रोक्षणीस्रुक्स्रुवमासाद्य चमसं चाज्यं तंडुलनांदु
ग्धं च हिरण्यं प्रोक्ष्य मार्जनं होमं चानुक्रमात् ॥ ततः आज्यासादनपर्यंतं
६६ पूर्ववत्कृत्वाग्नेः पश्चात्स्वस्य दक्षिणतः स्थिते प्राग्ग्रीवलोम्नि चर्मण्युप ६६
विष्टायां समन्वारब्धायां सत्यामिध्माधानाद्याज्यभागांतं हुत्वा गर्भा
नहोमं कुर्यात् ॥ कारिका च ॥ आज्यस्यादनपर्यंतं पवित्रकरणादिकं ।
आत्मनो दक्षिणे पार्श्वे प्रत्यगाननुहाजिने । मुर्वं णुपविष्टो लक्षानेज्यं

तवचनं यथा। चर्मण्यथोपविश्यासा स्समन्वारब्ध तेपती। स्वाद्वकृता गप
र्यंतमि ध्माघ्या नादिष्वत्रवं॥ अप्रागावाऽपां कुतीर्ड्धत्वामंत्रेञ्चवंतलदा
प्विति। अथ तायि॥ आज्यसंस्कारांतं कर्म करोति। ततोऽग्रे हगवेदा पूका
रेण। लेनविधानेन वर्मास्तीर्यतेचर्मणि स्त्वानांवृत्तमसे गलस्वा। स्त
वचनात्। कंवृत्तामालनोदक्षिणतउपवेश्य पयासमन्वारब्ध इध्मा
घ्मानाघाऽज्यभागांतं हुत्वा धाताददात्वित्यादिनि र्दैकृयदिति। अ
थहोमातं। धाताददात्विति द्वयो र्वामदेवोधातानुष्टुप्। आज्यहोमे
ॐ धाताददातुदाशुषेप्राचीं जीवातुमक्षितां। वयं देवस्यधीमं
हि सुमतिं वाजिनीवतः स्वाहा। धात्रे इदं। ॐ धातप्रजानामुत

शायस्त्रो धातेदं विश्वं भुवनं जजान। धाता दाष्टीरनिमिषाभिचष्टे

धाचेदृद्र्व्यं हृतवज्जुहोता। स्वाहा। धात्र इदं न मम॥ राका महमिति

द्वयोः। शौनको गृत्समदो राका जगती॥ आज्यहोमे॥ नेजमेषेति

सृणां गर्भकर्ता त्वेष्टा ऋषिः। लिंगोक्ता देवता। अनुष्टुप्छंदः। आ

ज्यहोमे। प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप्। इत्यष्टाज्याहुतीर्जु

२०० त्वा शिष्टैः आत्यगेहे शोभास्तुरवस्थित्यौदुंबरापच्यकुग्मस्नावकेन त्रिः स्त्रु २००

त्कया ज्ञालल्याद्विमिश्र कुशापिंजूलैः स्त्रीवृतेः। तमध्ये समंतल

लोटे। वेद्यायाः संधिमारभ्य आम्र्छेदेशान्त। मूर्ध्नदेशपर्यंतं स्त्रीमु

व स्वरसोमिति मंत्रेण प्रजापतिः प्रजापति वृहती। सीमंतं व्युहने विनियोगः।
अथ सूत्रं। अथास्य युग्मेन शलाटु ग्लप्सेन त्रीण्यपाय शलल्या त्रिभिः श्वेतै
श्चापिंजूलै रिति। अस्यार्थः। अस्या युग्मेन युग्मफलेन शलाटु ग्लप्सेन।
आमे फले शलाटु स्यादित्यमरः। ग्लप्सः स्तबकः। औडुंबरस्तबकेन शला
स्त्रो नैव दृष्टत्वात् तद भाव अन्वयेन। त्रीण्या। त्रिषु एनी श्येनी। वर्णे दाशा
तोव चातो नैतिडि। प्रान्त वारस्पनत्वं वा। एषा स्यामिति णत्वं। आवपा
नः स्थितागोरसावरे ताभ्या कर्बुर इत्यमरः। कुशापिं जूलैः। कुशान रूप
कैः। आरैरित्यमर्थः॥ एभिः स्वकीयसतेः। ललाट केशयोः संधिमारभ्य उ
र्ध्वं सीमंतं व्यूहेत्॥ अथ जयंतः। एतास्ति त्रीगिर्स राज्या कृतौ कुर्वीत ह्यौ।

यतस्याः एष्व तस्मिन्नाच्छन्न पूर्वाभिमुखः कर्म करोतीति। अथ सौनकः॥ उत्वो
त्वा यन्त्रिया याः प्रत्यग्देशो नु आकु खेस्थितः। औदुम्बरं च सबालकं युग्मा
पक्वफलान्वितं। त्रिश्वेतः शल्ली च रिक्षा जिहुकाशलली त्रीणि शाद्वलान्तरा एकी
कृत्य गृहीत्वा तान्समस्तान्नेवं पाणिना। सीमन्तं व्यूहेदिति शेषः। अथ गाथा नार्थ
वीणावन्तौ द्विजौ संशास्ति। सोमं राजानं संगायेतामिति प्रेषेण। तौ च सोमो नो
राजावतु संस्थितता म एव यथा लक्षणं गायतः। कुत्र स्थाने समीपे नद्याः संबुध्या ना
म कथयन्नि विशेषवक्तावरदे। इति वः। अथ सूत्रं। वीणागाथिनौ संशास्ति सो
मं राजानं संगायतामिति। वीणाया। गाथया। वीणागाथे ते यो स्तौ। यथा तौ सं १०२
१०२ शास्ति। सोममभिप्रेषेण। शौनकः सोमं राजानमित्यादि प्रेषेण प्रेरितौ द्विजौ।
गायं सोमानद्यां गायेतां च सवीणया। अथ स्थाने। संबुध्यं तं नदी

नामस्यान्नुप्रज्ञानिविष्टचक्रावावे यदिवीत न स्नामयीत त्रिर्जपन्ना मयं न देति।
ततः स्विष्टकृदादिसमाप्य। वृषभं दक्षिणां दद्यात्। ब्रूजाभिर्जीवपतिवाभिर्यद्य
दुपदिष्टं तदपि कुर्यात्। अस्य कर्मणः स्वयमेव कर्त्ता। नावर्त्तते इदं कर्म प्रतिगर्भ
मिति स्थितिः। दृष्टो वा नो। अस्मिन्पुत्रकामा ये गर्भमाधेहीति स्त्रीसंस्कारप्रतीतिः।
प्रति गर्भं नावर्त्तत इति गम्यते। सकृत्कृत संस्काराः सीमन्तेनद्विजात यः। यं यं
गर्भं प्रसूयेत स गर्भः संस्कृतो भवेत्। काले अवृत्ते चेत्स्त्री प्रसूतातदापि कु
र्यात्। इत्याह सत्यव्रतः। स्त्री यद्य कृतसीमन्तोप्रसूयेत कथंचन। पुत्रं गृहीत्वा वि
धिवत्पुनः संस्कारमर्हति। गर्ग्गोपि। यदि सीमन्तेनतः पूर्वं प्रसूता चेत्कुमानिनी।
तदा तां पेटके गर्भे संस्थाप्य संस्कारमाचरेत्॥ ॥ इति सीमन्तोन्नयनं॥ ६॥
अथ जातकर्म॥ जातादि स्नानपर्यन्तं कर्म स्वस्यादयोक्तं यां। पिता कुर्यात्
इर्ष्यं न्युपरिणेताय था। विधि। हेमाद्रौ। देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनां।

आयांति तस्मात्तद्दहः पुण्यं पुण्यं च सर्वदा। तत्र दद्यात्सुवर्णं च भूमिं गां तुरगं तथा।
छत्रं छागं माल्यं शयनं चासनं गृहं॥ इति याज्ञवल्क्यः॥ कुमारजन्मदिवसे वि
विशेषः कार्य इति गृह्यः। हिरण्यभूगवाश्वादि धान्यवस्त्रासनादिषु। तत्र सर्वं प्रति
ग्राह्यं पक्वान्नं तु विवर्जयेत्॥ अभ्यंगे यो दधिस्नाने दत्ता यावन्न मे श्रुते। जातं च निध
ने चैव तिथिस्नानं जालिकी भवेत्। रात्रौ दानं विभागं तु दद्यात्। भानोः पूर्ववासरः। उ
त्तरो वा प्रभाते न स्नानं दीपावस्तो श्रुते॥ सचेलं स्नात्वा तिथ्यादिवं संकीर्त्य।
अस्य कुमारस्य बीजगर्भसमुद्भवैनो निबर्हणेनायुर्यार्थं मेधा देशात्मर्थं जा
तकर्म करिष्य इति संकल्प्य स्वस्तिवाचनपूर्वकं हिरण्येनाभ्युदयिकं कुर्यात्॥ अ १०२
१०२ थाच स्मृतिः॥ अन्नाभावे द्विजाभावे प्रवासे पुत्रजन्मनि। हेमश्राद्धं प्रकुर्वीत लवं दद्या
द्गिरह तथा॥ इदं कर्म स्पर्शेन योग्यान्येषां शीनाः सहस्रकारी। अथैकादशेऽहनि सर्वे
... नीय पालकाः संस्कृतो रत्नथा। हिरण्येनावष्टभ्य दक्षिणत उपविष्टायां मातुर

स्यां गाः स्थितं कुमारं जातं ददामिति मंत्रेण सर्पिर्मधुनी हिरण्येन प्राशयेत्। ततो दक्षि
णकर्णे हिरण्यं निधाय तस्य मुखसमीपे आ मनो अनु स्वं नीयमानं इत्यृचं जपेत्।
मेधां तस्य वामदेवो मेधान्तु पुरः। अथैव सव्यकर्णे निधायैतामृचं जपेत्॥ अथम
न्त्रः। असावग्निमन्त्रात्वं मा मघवन्नज आशिषः चिन्निति चेति। अस्यार्थो व्यक्तो। स्नानवा
क्यार्थो मध्यगृहे वा। सः। अत्र त्रयः पक्षाः। सह देवत्रयो मंत्राः पर्यायेणाभिमर्शनामिति।
द्वाभ्यां वा मणि मर्शनं वत्स न तु पुत्रः स्नात्र सहो मन्त्रः। द्विर्वचन तु तौ च मंत्रस्य।
इह त्वे कवचन तु तौ। अन आहत्वा भाव्यं। ये नु देवा त्रां सा च चाते। किं तर्हि। कुमार
सर्वेव स्नस्मोत्रा नाचक्रिरिति॥ के ते मंत्राः। अश्मा भव इत्येषा स्नमय चधीति॥ द्वि
तीय प्रथमपक्षः॥ अश्मा भवेति। दक्षिणांस। इदमेषा त्वस्मे प्रयंधीति द्वाभ्यां
मांसमिति। कथमेतत्। नहि क्वचि मंत्रमध्ये इति कार पठति। इति द्वितीयः पक्षः।
अथ तृतीयः पक्षः। सहो देवत्र यो मंत्रा वक्तव्याः। न त्रयमंत्र विभागः। न यत्र यत्र गाभिम
र्शन द्वाभ्यां यानि मंत्रे त्रि वाक्य त्वात् स्थ गभिमर्शः। इहन्तु रा कयते। तु गापदं सो

स्वस्तु त्रिषूपस्पेषु तृतीयश्रेयान्। तथा च कारिकायां। अग्नेः। त्रयेणास्य तु गपदं
सावभिमर्शी दर्था। प्रथमाभ्यामभवेदंस्य श्रेष्ठानी तपरा तथा। तृतीया इसेत्रयं
पृथीति कुमार्यस्यादमं त्रकौमिति। यस्य त्रयाणां मन्यतमः पश्चोत्रिक्षतः। तस्यापि
कुर्वतो न दोषः। सर्वेषां गमकत्वादिति भाष्यकारः। तजेके मंत्रविभागः।
श्रेयानित्याऊः। इदमो ष्ठानीत्यस्य गृत्समद इदमिन्द्रि ष्टुप्। असमे प्रयं पृथीत्यस्य घो
103 रइदमिन्द्रि ष्टुप्। असावभिमर्शनं। येत्र होममिच्छेतित्रेनाद्रसाहुती जुह्वेदक
मेकुर्वति। ततः स्विष्टकृदादि। प्रबलो नामाग्निर्भवति। कुमारे दक्षिणा हस्तं
निधायायदममंत्रं जपेत्। स मंत्रः। इमां कुमार जरां धयन्तु दीर्घमायुः प्रजी
२०२ वसे। अस्मै स्तनो गत्वा ज्ञान आयुर्वर्चो यशो बलं। ततः बोधघसेति त्वा २०३
दि त्वन्तरस्मिन् रात्रिषो वावयेत्। बोधदिति वनस्य णो वामदेवो लिंगोक्ता गा
यत्री कुमारस्यायुर्वर्चने। एतत्कुमार्या अपि मंत्रवर्जं स्यात्। रात्रौ संध्यायां
महोज्जाला सौचिकार्यं। अन्यायां सौयेतरदन्ते कार्यं॥ इति जातकर्म॥ ॥ ६ ॥ ॥

॥ अथ नामकर्मोच्यते॥ नक्रान्त कर्मानंतरं कार्यं॥ अथवा जन्मदिनाद्दशमे द्वा
मे कादशे वा द्वादशे वा कार्यं। उक्तं मनुना। नामधेयं दशम्यां वा द्वादश्यां वापि का
रयेत्। पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते इति। स्मृतिसारे। एकादशे
ऽह्नि विप्राणां क्षत्रियाणां त्रयोदशे। वैश्यानां षोडशे कार्यं मासांते शूद्रजन्मनः इति।
अथ शौनकः। क्रियाणां नामाथ पित्राद्ये द्वादशे रामे द्वादशे पि वा। कुर्याच्च द्वा गुणे मु
क्ते नक्षत्रे गुणान्विते। उत्तरोत्तर रोहिण्या मैत्र चित्रा तथाश्विनी। पुष्य पुनर्वसो
स्वातौ रेवत्यां शशि दैवते। श्रवणद्वय हस्तेषु नामधेयं शुभावहमिति। अनडात्रा
ने पि एतानि नक्षत्राणि। अथ पत्नी कुमारो दक्षिण उपवेशय। अस्य कुमारस्य बी
जो गर्भ समुद्भवे नो निवर्हणे नातिक्नायार्थं अभिवादन विवाहादि ना स्वीय कर्म
सु संज्ञा व्यवहारसिध्यर्थं नामकर्माख्यं कर्म करिष्ये इति संकल्प्य स्वस्तिवाचनपू
र्वकं नांदीश्राद्धं कुर्यात्। तत्र पुण्याहवाचने स्वस्ति पर्याय मध्ये राम नाम्नेति स्वस्ति

भवन्तो ब्रुवन्तु। इति विप्राश्च देयुः। ततो रामनाम्ने स्वस्तीति प्रत्यूचुः। अथाभिवादनी
यं चोपांशुनाम दद्यात्। तदुपनयनपर्यन्तं मातापित्रोर्विदितं। यदि होमः
क्रियते तर्हि अनादेशे आहुती कृत्वा स्वस्तिवाचनं [illegible] यमध्ये पूर्ववन्नाम दत्वा
स्विष्टकृदादिहोमशेषं समापयेत्। तथा च शौनकः। पुरस्तात्तच्च मावार्यः
हावनादत्वा आहुतीः। ततस्तोनेष्टुपुण्याहप्रकारेणाथवा मं। नामधेनि
104 तमाधायततः स्विष्टकृदा। दिकमिति। अस्मिन्पक्षे स्वस्तिवाचनद्वयं
कार्यमिति भावः। अत्र पार्थिवो नामाग्निः॥ अथ नामलक्षणं॥ पुंसा द्व्यक्ष
१०४ रं चतुरक्षरं वा नाम भवेत्। तत्र घोषवदक्षरमादौ ह त्या मध्ये यरलवाद्यं। १०४
अन्ते विसर्जनीयं कुर्यात्। यथा रुद्रः। देवः। नागदेवः। भद्रदत्तः। इत्यलक्षणं
व्यवहारार्थं नाम जानीयात्। अथ सूत्रं। युग्मानि त्वेव पुंसामिति। अयुग्मा स्त्रैः
वक्तव्यतीति तेन एवकारात्। घोषवदादिपक्षस्य नो हेतुः। अयुग्माक्षराणि स्त्री

णां च वेति। विवाहादि पुत्रजन्मनामजानीयात्॥ मासनाम गुरोर्नाम दद्याद्बालस्य
वै पिता॥ बालो नंतोऽच्युतश्चक्री वैकुंठोऽथ जनार्दनः। उपेंद्रो यज्ञपुरुषो वासुदेवस्तथा॥
हरिः। योगीशः पुंडरीकाक्षो मासनामान्यनुक्रमात्॥ मार्गशीर्षादिति शेषः। अत्र
मनुना विशेष उक्तः। चतुर्थ्यंतमुदीर्यैतदोपितानन्नामकर्मणः। स्वस्तीत्याद्यं ब्रुवंतं
तं भवेत्पदमुदीरयेदिति। शर्मेव ब्राह्मणस्योक्तं राज्ञो राजसमन्वितं। वैश्यस्य पुष्टि
संयुक्तं शूद्रस्य प्रेष्यसंयुतं॥ ॥इति नामकरणं॥ ॥अथ निष्क्रमणं॥ चतुर्थे मा
सि षष्ठे वाऽष्टम्यां पदे पुण्यसंविधायै। शौनकोऽपि॥ मासे चतुर्थे षष्ठे वा शिशो
र्निष्क्रमणं स्मृतं। गृह्यादिति। पत्न्यं कुर्मोकस्य कुमारं दक्षिणत उपवेश्य तिथ्या
दिकं संकीर्त्य॥ अस्य कुमारस्य बीजगर्भसमुद्भवैनो निबर्हणेनातिवायादिव्या
र्थं आयुरारोग्यैश्वर्यादि सिद्ध्यर्थं विदेशागमनप्राप्त्यर्थं च निष्क्रमणा
ख्यं कर्म करिष्ये॥ तदंगत्वेन स्वस्तिवाचनं सुवर्कं मातृदीक्षादिं विधाय स्नानमलं

कृतमुक्तं स्वस्त्ययनं त्रिशुभाह्वाय देवायनं गत्वा देवं विधिवदभ्यर्च्य ब्राह्म
णानाशिषो गृहीत्वा देवं प्रदक्षिणीकृत्य मातृस्वसृगृहं मातुलगृहं वा गत्वा
तेषामाशिषो गृहीत्वा गृहं गच्छेत्। एवं कृते दीर्घायुर्भवति। आचार्यस्य तौ।। ।।
सोऽजयित्सो द्विजानाहूय स्वस्तिवाचनमाचरेत्। शाकुन्तप्रजपेत् सूक्तं शिवो
नि सूक्ष्मणा पिता। शाकुन्तेकनिक्रन्दज्जानुषं प्रदक्षिणिदम्भीति द्वे सूक्ते। द्वि
जाश्च दर्व्यां सर्वाणि मंगलानि पुरोनयेत्। दर्पणः पूर्णकलशः कन्याः सु
मनसोऽक्षताः। दीपमाला ध्वजा लाजाः संप्रोक्ता चाष्टमंगलं। विवाहे निष्क्र २०५
२०५ मे काम्ये चूडौ प्रवृत्ते समारम्भे। उत्सवे अस्यागायां प्रशस्त ध्यासे मंगले।।
अथ पंचमासे कर्तव्योपवेशनविधिः।। परशुरामप्रति अक्रूरेणोक्तः।। पं
चमे च तथा मासि पूर्वोक्तमुपवेशयेत्। तत्र सर्वे ग्रहाः शास्त्रोक्तो मारुति

यिरोम्गतः। निर्ध्यिं यवर्जं ये द्विजान्नात्स्तानि शृणु मा भिनिमे। उत्तराश्रितयः सौ
म्यपुष्य दर्ष्यं गुरुः देवतं। प्राजापत्यं चरुं स्त्रीं च त्रास्तमअच्चि निमित्रमं। व्रतं सूत्र
ये दैवं पृथिवी यत्तथाद्धिजानां। मुञ्जनं पूर्वं वल्लीत्वा गुरुदेव द्विजन्मनां। अश्मा
रमुपलिप्याथ हत्यात्त्र तुमं ऽके। दां स्वपुण्याहं ज्ञाह्येन अश्मोन तु पवेन्द्रीये
न्। मंत्रश्चोत्रमेव ज्ञामतन्मेनि गदतः शृणु। इमं वसुध्यते दो हसदा सर्वगतं
शुभं। आयुः प्रमाणं सकलं निक्षिप स्वाह रिडिये। आचिरायुष्य तस्सन्स्पथे
केचित्यारिपाथिनः। जीविताशेष्य विते ष्ठानिर्दहस्त्वा। चिरणालान्नः। धरण्यरे
ण भूतानां मातरस्त्वामधिवाह्यासि। अजराचा जमेया च सर्वस्तत नमस्तुते। च
मे वा शेषज गतां ज्ञाति श्चायाह्यश्मकोह्यसि। कुमारं पाहि मातस्त्वं ब्रह्मातद
नुमन्यतां। तस्योपवेशनं स्वसाश्मो ब्राह्मण मृजनं। ततः कायसुदाव

पूर्ववद्द्विजः गुरुस्त्रवेणीराजनादिभिः। एतत्कुमार्या अप्युपलक्षणं॥ इति [illegible]पुराणे
नो बालोपवेशनविधिः॥ ६॥ अथान्नप्राशनं॥ तत्र षष्ठेमासि भवेति। अष्टमेवा तिके-
यितं। नामधाकरणोक्तेन तत्रैवमुक्तेति थ्यादिकं संकीर्त्य अस्य कुमारस्य सर्व-
106 कामसिद्ध्यर्थं च द्धान्नतायुरभिवृद्ध्यर्थं च अन्नप्राशनाख्यं कर्म करिष्य इति संकल्प्य
पूर्ववद्घृतन्नान्दीश्राद्धमपरेद्युर्नित्यकर्मानंतरं दक्षिणतः प्राङ्मुखं स्नानमलंकृत-
मुपवेश्य संकल्प्यानंतरं दधिमधुघृतमिश्रमन्नमन्नपतेन्नस्य देहीति मंत्रेण प्राश्न-
येत्। यथेष्टं यथा भवति। मुखं प्रक्षाल्य। तेन सार्वकामो भवति। अन्नपत इत्यस्य
नलकूबरोन्नपतिर्द्विहरुती। प्राशने। अन्नेनप्रथमं कवलं प्राशयित्वा पुनस्त- २०६
२०६ स्मै यथेष्टं भोजयित्वा मुखं प्रक्षाल्य स्विष्टकृदादि होमशेषं समाप्य ब्राह्म-
णान् भोजयित्वा दक्षिणां दत्वा शिशोर्वाचयेत्॥ शौनकः। होमपक्षाभ्यजश्चापि

ऽऽ नवकर्मैव समाचरेत्। वृद्धिश्राद्धं तु सर्वेषु कर्मस्विन्यप्रहेमसमाचरेत्॥३ नैरेषा स्मृ च
प्नान कौतुकं तु यथाविधीति। अन्नप्राशनमातिथ्या विवाहं वा स्तकर्म चारात्रा
वहनि वा तुर्या छे षाण्याहानि कारयेत्॥ ॥इति अन्नप्राशन विधिः॥ अन्नभुजि
ताम्निः। अन्नप्राशनानंतरं जीविकापरीक्षा तु मार्कंडेयेन॥ अग्रतोथ प्रविन्यास्य
शिल्पभांडानि सर्वशः। शस्त्राणि चैव वस्त्राणि ततः पश्येत्तु लक्षणं। प्रथमं यत्स्पृ
शेद्बालस्तत्ताभांडं स्वयं तदा। जीविका तस्य बालस्य तेनैव तु भविष्यति॥ इति
जीविकापरीक्षा॥ ॥अथ चौलकर्मकाल उच्यते॥ मनुः। चूडाकर्म द्विजाती
नां सर्वेषामेव धर्मतः। प्रथमेऽब्दे तृतीये वा कर्तव्यं श्रुतिचोदनात्॥ यमस्तु। ततः
संवत्सरे पूर्णे चूडाकर्म विधीयते। द्वितीये वा तृतीये वा कर्तव्यं श्रुतिचोद
नात्॥ आचार्यस्त्वसौ तु। तृतीये पंचमे वाब्दे चौलकर्म प्रशस्यते। प्राग्वा स
मे सप्तमे वा सहोपनयनेन वा। ऽ [illegible] नां तु कुलधर्मानुसारतो वा

वस्था। येषां कुले यस्मिन्वर्षे चौलकर्म क्रियते तस्मिन्वर्षे तत्कर्तव्यं। अत एवाह सू
त्रकारः। षड्वर्षाणि च अज्ञानाधिकाराज्जन्मादितृतीयेब्दे तु चौलकं। [illegible]दंशः कु
107 लधर्मस्यानीदृशां चौलकर्म च। आद्येब्दे कुर्वते केचित् तं च मे त्वद्वितीयके। उ
पनीत्या सहैवेति विकल्पः कुलधर्मतः। तथा च कारिकायां। यथाप्रयं चाकृतः
विदुपनीत्या सहैव तद्भवेति। एवं यथोक्तवर्षे उदगयने आपूर्यमाणपक्षे कल्याणे
नक्षत्रे कार्यं॥ अथ सूत्रं। उदगयन आपूर्यमाणपक्षे कल्याणे नक्षत्रे चौलकर्मो
पनयनगोदानविवाहाः सार्वकालमेके विवाहं तेषां पुरस्ताच्चतस्र आज्याहुती
र्जुहुयादग्न आयूंषि पवस इति तिसृभिः प्रजापते न त्वदेतान्यन्य इति च व्याहृति १०७
१०७ भिर्वा समुच्चयमेके नैके वा। त्वमर्यमा भवसि यत्कनीनामिति विवाहे च
तुर्थीं॥ सूत्रार्थः॥ चौलकर्मेति चौलस्यैव संज्ञा। कर्मशब्दस्य सार्थकत्वाभि
प्रायात्। गोदानं चौलवत्कार्यं मिसकेशान्तचौलग्रहणे नैव गोदानशब्दो सत्यां पुन

गौदानब्रह्मणां समावर्त्तनार्थे विवाहस्य उदगयनादिकालादन्यस्मिन्नपि
काले भवति। तथा च स्मर्यते। ऋतुमत्यां हि तिष्ठन्त्यां दोषः पितरमृच्छतीति। च
तुर्ग्रहणाद्दाक्षायणीयेन भवत। विवाहस्त्वयमयं मेति चतुर्थ्यादीति। अत्रापि तद्
पञ्चमी। स्व स्व मन्यत्र। चौलकर्मापनयने विवाहः प्रथमस्तथा। व्रतादिस्नानमि
त्येषां लौकिके ग्नावितिस्थितिः। अत्र भगवान्॥ अथ चौलप्रयोगः॥ गृह्यमले
स्वस्य पूर्वेद्युर्नान्दीश्राद्धं कुर्यात्। पूर्वेद्युरेव सकलान् संभारांश्च यथाचिता
न्। संस्रस्त्याभ्युदयश्राद्धमपि कुर्यात् यथाविधीति। अत्रापि श्राद्धे नक्षत्रस्थितिवा
चनमहयज्ञौ सम्पद्यीयते। अनयोः शुभकर्माङ्गकरणत्वात्। अथ चौलकर्म
प्रयोगः॥ गृह्यमलं सत्यापूर्वेद्युर्नान्दीश्राद्धं कुर्यात्। स्नानकादिप्राप्तोऽसत्स्यां
काले बध्नाति। एकविंशतिं हरयन्ते विवाहे दश वासरान्। त्रिषट् चौलोपनये

ने नांदीश्राद्धं विधीयते। अथप्रहातं। अपरेद्युः कुमारस्य चौलं स्नानमलंकृतं तु कुमारस्व
स्त्ययनं कृत्वा कौतुकं वस्त्रं चैव पल्लवं करस्थं तु मातुः दक्षिणतः उपवेश्य लौकिकाग्निं सं
स्थाप्य तत्स्य इति नामतो भवति। मनुः। जातकर्मादि संस्काराः स्वकालेन
भवंतिचेत्। चौलोदर्वाक्कृतकु र्वीत प्रायश्चित्ताद नंतरं॥ जातकर्मप्रलक्षणां॥
गर्भाधानमारभ्य चौलपर्यंतं कर्माण्यतीतानि चेत्तानि प्रायश्चित्तेन हुतेन पश्चात्कु
र्यात्। समावर्तनं तत्र प्रायश्चित्तमेकैकेषु संस्कारेषु दद्यात्तु स्यात्। आदौ कृता
तीतहोमं हुत्वा पश्चाच्चौलकं होमं कुर्यात्। कालातीतहोमं हुताकृतः॥ कारिका।
१०८ प्रायश्चित्तं हुतेपश्चात्तीसमपि कर्म वो। कार्यमित्येव। आचार्यनिलनं तु विप १०
श्चितइति॥ अथप्रहातं॥ अस्य कुमारस्य बीजगर्भसमुद्भवैनो निबर्हणा
र्थाति चायसंस्कारार्थं चौलाख्यं कर्म करिष्ये तत्राग्न्याधानं करिष्ये। देवता

108

पारस्करार्थमित्याघारौ तत्कृत्वा तत्र प्रधानदेवताः त्रिवारमग्निं पवमानं प्रजापतिं
वा[illegible]द्रव्येणेत्यादि सर्वं वत्कृष्णधान्यं निधाय तां तेहाचाग्नेरुदग्भागे व्रीहियवमाषति
लैः पूर्णानि शरावाणि निदध्यात्। यवाभावे व्रीहयो ग्राह्याः। एकस्मिन् शरावे अ
नडुहो गोमयं द्वितीये शरावे शमीपर्णानि च निक्षिपेत्। एतद् शरावपात्रं समीपस्था
निदध्यात्॥ ॥अथ यजनं॥ अग्निप्रतिष्ठापनान्तं कृत्वाग्नेरुत्तरतः पश्चाद्वा यानि
शरावाणि व्रीह्यादिभिः पूरितानि प्रागपवर्गाणि स्थापयेत्। आज्यसंस्कारान्ते वेदि
पश्चिमेन वस्त्रासने नरे चोलहोतः समीपे जननी निविष्टाः। अङ्केन बिभ्रती पुत्रमासीत तत्रा
नुरवी सती। तस्याः पृष्ठदेशादग्नेः सम्मुख्याद्वा नडुहं चोपक्रमेत्। अस्य श्राद्धमिति न्यस्य
शरावे स्थापयेत्ततः। शमीपर्णयुक्तानि चान्यस्मिन् शरावे न्यस्य भूतले। तत्रैव स्था
पयेद्देवो सहात्पात्रस्य पार्श्वतः। कारिका। पूर्णपात्रं निधायाथ तमुपलेपादि सर्वव
त्। व्रीहिपूर्णं शरावं स्याद्यवपूर्णं तथापरं। माषपूर्णं तथान्यस्यात्तिलपूर्णं तथा

परमिति॥ आचार्यः। केशवपना स्वहृजा। ताना मोषद्धित्वं निगघने। एतास्तु पक्वा स्क्वेचा
सुबीजाद्दच्चा स्मरेत्तथा। अथ मातुर्दक्षिणतः पिता एकविंशत्कुशांकुरानादाय
आस्ते अस्मिन्पक्षे अन्य एव कर्ता स्यात्। ब्रह्मावादाय आस्ते॥ कारिका॥ मा
तुर्दक्षिणतो ब्रह्मा सप्तमस्य च सप्त च। कुशापिञ्जलकानां तु गृहीत्वास्ते यथा पितेति।
109 पितुर्धीरतापक्षे न्य एव कर्ता स्यादिति॥ ॥ अत एव शौनकः॥ ततः कुमारस्य पिता
हस्ते बिभ्रत्कुंभकुशांकुरान्। एकविंशति मासीनं क्षितौ मातुस्तु दक्षिणे। पितुर
भावे दर्वा न्य पक्षे स्मिन्चौलयेन्नरः। ब्रह्मत्वेनाहितो विप्रो धारयेद्वा कुशांकुरान्।
अस्मिन्पक्षे पितैवास्ते। कर्ता चौलस्य कर्मणः। अथाज्यसंस्काराद्या घारांतं कृत्वा प्र १०८
१०८ धानहोमं कुर्यात्। संग्रहे। योजोपनीयो त्स्विल्लेविंशतेषु अन्नोदने दारपरिग्रहे
या। क्षमा सा वै गोदानविधौ च समावर्तनाज्यभागो प्रवदंति संतः। अग्न आयूंषि निति
स्मृणां चोतं वैखानसा ऋषयः। अग्निपवमानो देवता। गायत्री छंदः प्रधानआ॰।

प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप् प्राप्रधान आज्यहोमे ।०। इति चतसृभिर्जुहुयात् ।
सम्बुद्ध्यपदे ॥ भ्रात्रा वाकृत यो न वेति । स्रक् । आकृतयश्च ॥०॥ व्याहृत्या कृतयश्च कुमा
रस्य पश्चात्स्थित्वा दक्षिणहस्तेनान्नमुदकं सव्यहस्ते वा सोदकं गृहीत्वा एकस्मि
न्पात्रे उष्णेन वायउदकेनेहीं त्वेनेन मन्त्रेण युगपन्निक्षिपेत् न जनवनीते क्षिपे
त् । आभावे दधिरसं क्षिप्त्वामिश्रीकृत्य तदप्यामेकदेशं गृहीत्वा । अदितिः केशानि
त्यादिमन्त्रेण वामकर्णादारभ्य दक्षिणं शिरः दन्त् । आङ्कुर्यादित्यर्थः । प्रत्ये
कं मन्त्रावृत्तिः । अथवा सदक्षिणकेशपक्षे त्रीनङ्कुरानभ्यामभ्यानोषधे त्राय
स्वैनमिति मन्त्रेण न्यसेत् । स्वधित इति मन्त्रेण ताम्रक्षुरं न्यसेत् ॥ अथसूत्र ॥ स्व
धिते मैनं हिंसीरिति निःपीडं लोहेन क्षुरेण सच्छिनत्तीति ॥ अस्यार्थः । स्वधीतेऽ
नेन मन्त्रेण तानि कुशानि ज्वलानि निःपीडयति । तत्क्षुरं स्थापयतीत्यर्थः ॥ लोके क्षु
रो लोह एव प्रसिद्धः । अतोऽत्र स्पावा वाच्यत्वात् । लोहं ताम्रस्तान्नेवेत्ते । ताम्रवीतर
विहितत्वाच्च । लोहशब्दस्य ... तादि ... अजकुतान्ने तनथा लोहस्य ताम्र ।

ततो येनावपदिति मंत्रेण सर्वकेशां यथा तथा तांश्छिंद्यात् ताम्र कुशपत्र शमीपर्णैः सह मा
यीहस्ते दद्यात्। सा च तान् गोमये निदध्यात्। पुनः कुशपिञ्जूलनिधानादि पूर्व
वत्कृत्वा येन भूयश्चेत्यनेन मंत्रेण छिंद्यात्। पुनश्च तृतीयं कुशपिञ्जूलनिधाना
दि कृत्वा। एभिस्त्रिभिर्मंत्रैश्छिंद्यात्॥ ॥अथ कारिका। एवमेवोत्तरेण दक्षि
णकेशछेदनं भवेत्। ततः। यत्क्षुरेणेति मंत्रेणाचार्य आस्यमूलपर्यंतं क्षुरधारां नि
दध्यात्। स मंत्रः। यत्क्षुरेण मर्चयता सुपेशसा वप्ता वपसि केशान्। शुंधि शि
रो मास्यायुः प्रमोषीः। अथ शीतोष्णाभिरद्भिरिति विशेषेण नापितमनुशास्ति। ततः
शीतोष्णैः पूर्ववत्क्लेदितैर्मस्तके केशान्नापितो हि लवनवेशान्वारतः शिखाः हित्वावपे ११०
त्। मध्ये शिरसि चूडा स्याद्वाशिष्ठानां तु दक्षिणे। उभयोः पार्श्वयोरत्रिकश्यपा ११०
नां त्रिशिखा मता। अथो सर्वकेशान्ते कुमारं दक्षिणत उपवेश्य स्विष्टकृदादिहो
मशेषं समाप्य व्रीह्यादिपात्राणि चतुष्टयं नापिताय दद्यात्। एतच्चौलहोमं विनानु
ष्ठानं त्वकं स्यात्॥ ॥इति चौलं॥ शिशोर्मातरि गर्भिण्यां चूडाकर्म न कारयेत्

गर्भेऽष्टमे वर्षे गर्भिण्या यदि वा भवेत्॥ गर्गः॥ गर्भिण्यां मातरि शिशोः क्षौरं सूनोर्न का
रयेत्॥ यज्ञं चाष्टकान्तायां गर्भिण्यामपि कारयेत्॥ चूडाकर्म शिशोर्माता गर्भिणी यदि
वा भवेत्॥ गर्भस्यावा विपत्तिः स्यात् ... सहोपनीत्या कुर्याच्चेन्न हि दोष
न विद्यत इति॥ ॥अथोपनयनं॥ तत्राष्टमे वर्षे गर्भाष्टमे वा कार्यं॥ ब्रह्मतेजोऽभिवृ
द्ध्यर्थं विप्रोऽष्टमवर्षमर्हति॥ आचार्यः॥ गर्भाष्टमे वाब्दे पंचमेऽपि वा॥ द्विजत्वं प्राप्नुयाद्वि
प्रो वर्षे चैकादशे नृपः॥ कात्यायनः॥ ब्रह्मवर्चसकामस्य गर्भतो जन्मतोऽपि वा॥ सप्तमे
ऽपि कुर्वीत ब्राह्मणस्योपनायनं॥ काम्यकालः॥ तत्र विष्णुः॥ षष्ठे तु धनकामस्य
विद्याकामस्य सप्तमे॥ अष्टमे सर्वकामस्य नवमे कान्तिमिच्छता॥ कर्तव्यं दशमे वर्षे च
नकामस्य चैव तथा॥ एकादशे चेन्द्रियार्थी पश्वार्थी द्वादशे द्विकः॥ द्वादशे द्वे त्वति
क्रान्ते प्रायश्चित्तान्वितो द्विजः॥ यद्दति यज्ञमंत्राणां पावमानीभिरेव च॥ त्र्यम्बकैः सामभिः
पुण्यस्नानं ततः कृत्वा वरं कुर्यात्॥ मौञ्जीबंधनं कुर्यात् तेजस्वी भवेत्॥ याज्ञवल्क्यः॥
आषोडशाद्द्वाविंशाच्चतुर्विंशाच्च वत्सरात्॥ ब्रह्मक्षत्रविशां काल औपनीयनि

कः परः। अत ऊर्ध्वं पतन्त्येते सर्वधर्मबहिष्कृताः। सावित्रीपतिता व्रात्या व्रात्यस्तोमादृ
ते क्रतोरिति। क्रतेऽनु तस्मिन्नुपनयनाधिकारो भवति। पितैवोपनयेत्पुत्रं तदभावे पि
तुः पिता। तदभावे पितुर्भ्राता तदभावे तु सोदरः॥ इति गर्गः॥ पितापितामहो भ्राता
ज्ञातयो गोत्रजाग्रजाः। उपायनेऽधिकारी स्यात्पूर्वाभावे परः परः॥ अथ प्रायश्चि
त्तं॥ कपर्दिकारिका॥ ॥आचार्यस्यादौ स्वशरीरशुद्धिं कृत्वाथ शिष्यस्य शरीर
शुद्धिं। कृच्छ्रत्रयेणाप्रथमं यथावत्तु पर्यन्ततस्तत्र मुपायनस्य। नान्दीश्राद्धे हुते
पश्चाद्दत्त्वा यस्य कालिकः। मौञ्जीबन्धनं दाक्षयी द्विधारं नं नकारयेत्॥ छ॥
१११ अथ प्रयोगः॥ पूर्वेद्युः कृतयथोक्तं संपादितसामग्रीसंपादाचम्य प्राणानायम्य तिथ्या १११
दिकं संकीर्त्य अस्य वटोः उपनयने समगायत्र्युपदेशाधिकारार्थं कृच्छ्रत्रयमितं
प्रायश्चित्तं करिष्ये॥ ततः। अस्य वटोः कामवादकामचारकामभक्षणादिदोषप्रति
हारेणोपनयनाधिकारार्थं कृच्छ्रत्रयमितं प्रायश्चित्तं करिष्ये॥ यद्वा॥ उपनयनयमे

गा सहयोल्लकरागपक्षेसंख्याऽरहयं संकीर्त्य युगपत् स्वस्तिवाचनं ग्रहयज्ञं नांदीश्राद्धं कु
र्यात्॥ अथ ग्रहयज्ञः॥ तत्र संकल्पः॥ अस्य कुमारस्य उपनयनादौ नवग्रहानुकूल्य
सिद्धिद्वारा परमेश्वरप्रीत्यर्थं ग्रहयज्ञं करिष्ये इति संकल्प्य ग्रहयज्ञं समाप्य स्वस्ति
वाचनपूर्वकं नांदीश्राद्धं कुर्यात्॥ तथा च समर्थने॥ ग्रहोपास्यदीयकं श्राद्धं स्वस्तिवाच
नपूर्वकमिति॥ तत्र संकल्पः॥ अस्य कुमारस्य वेदाध्ययनेन सम्यक् ब्राह्मणत्वसिध्य
र्थं आयुरारोग्यादिप्राप्त्यर्थं सकलवेदिककर्मनिर्विघ्नोपलब्ध्यर्थं उपनयना
ख्यं कर्म करिष्ये इति संकल्प्य। तदंगभूतं स्वस्तिवाचनपूर्वकं नांदीश्राद्धं करिष्ये
इति संकल्प्य। स्वस्तिवाचनं कृत्वा। कुलदेवतावाह्यादि वह्निमाधाय यथोक्तप्रकारेण नां
दीश्राद्धं कुर्यात्। अथापरेद्युः कृतस्नानमलंकृतमभुक्तस्वस्त्ययनं कृतकौतुकबंधं
कृतभोजनमुण्डनं त्रिमासांगं भूयोऽपि स्नानं ज्योतिःशास्त्रोक्ते मुहूर्ते समीपमानीय तं स्वे
स्वं सम्यगासीनम्॥ तत्र दर्भहोमस्तत्र॥ अलंकृतं कुमारं कुशालीकृतनिर्विज्ञमिति। कुशा
लीकरणं वपनमित्यर्थः॥ तिथ्यादिकं संकीर्त्य अस्य कुमारस्य द्विजत्वसिध्यर्थं उप

नयनाख्यं कर्म करिष्य इति संकल्प्य उपलेपनाद्यग्निप्रतिष्ठापनान्तं कृत्वा समिद्द्वयमा
दाय अस्य कुमारस्य द्विजत्वसिद्ध्यर्थं क्रियमाणे उपनयनहोमेऽन्वाधानं करिष्य
इत्याद्याज्यसंस्कारान्तं चोल्लवत्कृत्वा वस्त्रं दद्यात्॥ कारिका॥ आज्यसंस्कारपर्यन्त
मुपलेपादि सर्ववत्। परिधानं नवं दद्याद्वासः सेवाहतेन तु। नवे प्रावरणं वासः
कृष्णाजिनमथापि वा। एवं कृत्वा कुमारं तं कुर्याद्यज्ञोपवीतिनमिति। युवं वस्त्राणी
त्यस्य दीर्घतमा मित्रावरुणौ त्रिष्टुप्। वस्त्रपरिधाने०। प्रावरणे च॥ अत्र ब्रह्मचा
रिणः कौपीनधारणमप्यस्ति कुतः। कौपीनमप्यावर्जितं तथान्ये ब्रह्मचारिण इति
स्मृतेः। आचार्येणापि मेधाजनने तु कं॥ वाससी ते च गुरवे मेधाजननकर्मणि।
११२ दद्यात्तावन्मात्रमेव कौपीनं न च वर्जितमिति॥ ॥ अत्र भगवान्॥ तत्रादौ परिधाना ११२
र्थं कल्पयेन्नववस्त्रकं। शिरोवगुण्ठनं चैव न वमन्यन्न कल्पयेत्॥ शिरोवगुण्ठन
मेत्रप्रावरणस्थानीयं। यथाक्रमजिनं वापि कल्पयेदवगुण्ठनं। उपवीतं वसं प्राप
नथाहास्य मृगाजिनमिति॥ अत्रेदं गृह्यसूत्रं॥ अहतेन वाससा संवीतं मेखला ये

न चाजिनेन ब्राह्मणं रौरवेण क्षत्रियमैणेन वैश्यमिति। अहैलक्षणं नेवेतस्माद्
भुं। ईषद्धेतं न वंश्चेतं सदृशीयत्रधारितं। अहतं तद्धि जानीयात्सर्वकर्मसुपा
वनं। अन्यदपि लक्षणमस्ति। अहतं यत्र निर्धौतमुपवासस्त्रयं कृतं वा। दीक्षित
मागल्लिख्येषुताव त्कालं न सर्वदेति। कार्ष्णं रौरवं वाप्यानि विप्रादेरजिनानि
तु। अहतं वस्त्रयुग्मेनु भ्वतं रक्तमथापि वा ति॥ ॥स्मृत्यंतरे॥ अंगुलं वाहि
लोम यद्वास्यचतुरंगुलं। अजिनं धारयेद्विप्रश्चतुर्विंशाष्टषोडशं। एतन्नि
त्यधारणार्थे देयं। एलद्वस्त्रानंतरमेव केचित्कुर्वंति। तद्वितंसा॥ अथ रौरवः।
अथोत्ता यथुपुरुषं वंशः पश्चात्किंचानुमाणं च। प्राङ्मुखं समवस्थाप्य परि
धापयेत्कर्म तत्र। अथास्य दक्षिणकरं किंचिद्दर्भ प्रसा रितो। स्थापयित्वा
द्वितीयेन वाससा वाचा नेजिनेन वेति। मित्रस्य चक्षुरिति तस्य वामदेवो जिनोत्रि
ष्टुप्॥ अजिनधारणे।०। मित्रस्य चक्षुर्धरुणं बलीयस्तेजो यशस्वि स्थविरं

रंसमिद्धं । अनाहतस्यैव सन्तं ज दि ह्युपरीदं वा उ जिनं दधे दं । अत्र वासो ऽजि
नयोर्विकल्पः । उभयोरपि प्रावरणार्थत्वात् । एतावत्तु साधारणं यद्यजिनं प्राव
रणं न दा ब्रह्म चर्य विवो । यथा । क्रमभेणेये रो रवाणार्थत्वात् । एतानि भवन्ति ।
ऐणेयस्य व्याख्याने । कुतः । ऐणेयेन तिस्रो ज्ञो कृत्वात् । एणस्य स्त्री ऐणी तस्या
इदं ऐणेयं । एण्या ट मिति ढन्यगस्त्यः । कुत एवाभिधानं । एण्या श्यामा च मेणे
यभेण स्त्रीनु ते त्रिविष्ठमरः । एवं मृगय जिनं प्रावरणार्थं ग्राह्यं । वस्त्रेण विक
ल्पो [illegible]कः । इष्टकः । अपरत्र । ह्यस्मम्गस्य पुरुषस्य नित्यत्वेन धार्यं । तच्च
यज्ञोपवीतानन्तरं विहितं ॥ ॥ अत एव दौनकः ॥ निक्षिप्य ब्रह्मसूत्रं तु विन
११३ स्याधः प्रसार्य च । वामांसस्थाप्य प यि तेन तथा ह्यस्मम्गाजिनमिति । प्रश्न ११३
तो । यज्ञोपवीतमिति यज्ञोपवीतं । दधात् । अस्याहिरण्यगर्भः परस्मा त्मा । त्रिवृ
द । ओं नमस्कार्तकर्मानुष्ठानासिद्ध्यर्थं यज्ञोपवीतधारणे विनियोगः ।

नृतः सुसमृगा ऋिनं दद्याच मेत्र। अथ हुताचमनं वटु माज्यं यज्ञपात्राणि चोत्तरेणा
नीत्वा अग्निमात्मानमंतरेणानीय दक्षिणेनोप वेशयेत्। अत एव तेन वक्ष्यमाणं
नवमो आद्दियज्ञांगाडुत्तरेणातेनीत्वामा व मोचार्य वेदि वात्मानमंतरा। गमूयि
चालनः पार्श्वे दक्षिणे चोपविशेत इति॥ अथ॥ बर्हिरास्तरणादिस्या ध्रुव संमार्जनां
तकां तथाच कारिका॥ बर्हिरास्तरणादिस्यात्स्रुव संमार्जनांतकं मिति। अथ धमाधा
ना घाघारांतं कृत्वा। सर्वं वचनं स आज्या कृतीं कृत्वा। अग्नेरुत्तर आचार्यं ति के प्रा
ङ्मुख स्तिष्ठेत् प्रत्यङ्मुखो वटुर्ध्याद्व्यवधानं परिहरेत्। अथाचार्यो बटोरंज
लिं प्रगृह्य तदुपरि आचार्यहस्तमंजलिमन्वपूरयेत्। तेनरत्न सावितुरिति मंत्रेण।
शिष्यांजलो स्वांजलिस्थमुदकमवदापयेत ततः शिष्यांजलिंगताभ्यां पोवसारयेत्।
तत्सवितुरिति मंत्रस्य वृषा वाश्वः सविता त्रिष्टुप्। अवदानप्रयोगे विनियोगः। ततो द
वस्यत्वे त्यादिगृह्णामीत्यंत मंत्रा देवदत्त नाम नितिबो स्वाव रोर्दक्षिणाहस्तं
सांगुष्ठं गृह्णीयात्। पुनस्तद्दक्षपाणि करग्रहे तु। अग्निनाचार्यं वाक्ष्यदेन

सविताते हस्तमग्रभीन्न्। देवदत्त शर्मन्निति मंत्रः इतरः समानो। पुनस्ताद्वरणादि
वाचयेत्। अग्निराचार्यस्तव देवदत्त शर्मन्निति। देवदत्तशब्देन तस्य नाम स्या
त्। अथाचार्यो देवसवितरिषनेन रक्षिमीक्षयेत्। उ मौर्वं वस्त्रित्वा आचा
र्यः कस्यनिमंत्रस्तुत्वा। एनं प्रजापतये परिददामीति वदेत्। शौनकोपि। धाने प
रिददाम्यनमिति संकल्प पूर्वकं। कस्य ब्रह्मादि वं। मं त्रं ददामेतं गुरुर्जपेत्। ततो
युवासुवासा इत्यर्धर्चेन प्रदक्षिणमाङ्कुर्वन्तमुत्तरार्धर्चेनास्य अंसयोरु
परि पाणिहत्वा हृदयं स्पृशेत्। शौनकोपि। युवासुवासा इत्यस्य पथार्धर्च्चे १२४
१२५ मुदीयतां। प्रदक्षिणमुपावर्त्यमाप येत्प्राङ्मुखं बटुमिति। युवासुवा साइत्य
स्य विश्वामित्रो मुख्यस्त्रिष्टुप्। पूर्वार्द्धर्चेन प्रदक्षिणावर्तनेन प्राङ्मुखकरणे वि। ०।
उत्तरार्द्धर्चेन सहृदयस्पर्शने वि। ०। पूर्ववदुपविश्य ततोग्निं परिसमूह्य ब्र
ह्मचारी नेक्ष्यमिध मादध्यादिति सूत्रे। परिसमूहन वचनमर्थकं संस्कारत्वादग्ने

सायंप्रातराधाने परिसमूहनपर्युक्षणे स्यातामिति परिसमूहनवचनं । अत्र तु
परिसमूहनाद्युक्तत्वेवन्तौ समेन्ते गाग्ने ब्रह्मचारीन्द्रस्त्री समिधमादध्यात्सु
एकमन्त्रमिच्छन्ति स्म मन्त्रः । अग्नये समिधमित्यस्य वामदेवोऽग्निरनुष्टुप् । समि
धोमे ।०। अग्नये समिधमाहार्षं बृहते जातवेदसे । तया त्वमग्ने वर्धस्व समिधा
ब्रह्मणा वयं स्वाहा । ततो हस्तप्रक्षाल्याग्निमुपस्पृश्य तेजसेत्यनेन मन्त्रेण
आ स्वावलोमकौ संवृत्तौ हस्तौ ललाटदेशादारभ्य त्रिवद्यौ निमार्ष्टि ॥
त्रयतः । तेजसामित्यनेन मन्त्रेणोष्ठावलोमकौ संवृत्तौ हस्ताल्ललाटदेशादारभ्य
द्विमार्ष्टीति ॥ कारिका ॥ उपस्थायमपीत्यादिषड्भिर्मन्त्रैरनः परमिति । मयि मेधा
मिति षण्णां वामदेव ऋषिः पूर्वत्रयाणामग्निरिन्द्रः सूर्यो देवता उत्तरत्रयाणा
मग्निर्देवता आसुरी गायत्री छन्दः । अग्निउपस्थाने । मौनस्तोत्र इत्यस्य कुत्सो
रुद्रो जगती । अनेन भस्मादाय आयुषमिति ललाटे । क॰ कश्यपस्येति कण्ठे । अग

स्वस्यस्येति नाभ्यां। यद्देवानामिति दक्षिणं सोन स्त्रोअंसे इति स्कन्धे। त्र्यायुषमिति
शिरसि स्नानथा च कर्मप्रवराणि। त्र्यायुषमिति मंत्रेण कुर्याद् ब्रह्मचारिपुत्रकं॥ अथ वा स्वत्र
मंत्रेण कुर्यात् तन्तुरूपेण वा। ॐ नम इति त्या दि पवित्रं च नप र्यन्तं कुर्या त्॥ ॐ नमो
नारश्वमे। अथ गायत्र्युपदेशः॥ बटुप्रस्संस्कुरवं कुर्यात्। संग्रहे। प्रत्यङ्मुखस्य चे।
दारग्राहकयोः स्थितिः। विवाहे चैव सावित्रीप्रदाने चैवमेव हि। अथ ब्रह्मचारी द
क्षिणजान्वनुनिपात्य आचार्य पादौ दक्षिण हस्तेन दक्षिणं। सव्यहस्तेन सव्य
मित्यव संग्रहोऽभिवादनीय नामोच्चारो वचनम्। अमुक शर्माहं भो आचार्य त्वां
१२५ अभिवादयामी स त्वा अधीहीत्यादि कं शेषं कुर्यात्। अथाचार्यः। बटोः परि १२५
धान वाससा स्वपाणिभ्यां स्वपाणी संगृह्य गायत्रीमुपदिशेत्। तत्र प्रथमं प
दः स्वयमुक्त्वाशिष्यं वाचयेत्॥ कारिका॥ ॐ भूर्भुवस्वः एवं तु सावित्री
वाचयेदथा पादं पादं च सावित्र्याः स्वयमुक्त्वाथ वाचयेदिति॥ शौनकः॥ १॥

सावित्रीं स्वयमाचार्यः पूर्वं पठेत्तथैव तां। शिष्यं च वाचयेत्पश्चादुच्चार्याई र्द्धर्चशः
स्वयं। तथैव वाचयेच्छिष्यमथोक्त्वा सकलां स्वयं। पूर्वं तथैव शिष्यं च वाचयेदि
त्ययं क्रमः॥ अत्रानेनैव यथा त्रिवारं वाचयेत्। ततोऽस्य हृदयोर्ध्वांगुलिपाणिं मम व्रतइ
ति स्थापयेत्। मम व्रत इत्यस्य मंत्रस्य परावकदास ऋषिः। बृहस्पतिर्देवता त्रि
ष्टुप्छन्दः। अस्य हृदयोर्ध्वांगुलिपाणिनिधाने विनियोगः। ततो मेखलां ब
ध्नीयात्। इयं दुरुक्तादिति मंत्रस्य। वामदेवो मेखला त्रिष्टुप्। मेखलाबं
धने विनियोगः॥ ततो दण्डं दद्यात्। स्वस्ति न इत्यस्य स्वस्त्यात्रेयो विश्वेदेवास्त्रिष्टु
प्। सानुपालम्भा स्यात्॥ तस्य प्रमाणं। ललाटादुपरिस्थितकेशान्तमापनः। अ
थ ब्रह्मचर्यमादिशेत्। तत्रैवं प्रैषार्थं ब्रूयात्। त्वं व्रतं च ब्रह्मचार्यसि मू
त्रपुरीषयोः कृत्वाचमनं कुरु। कर्म कुर्विति संध्योपासनादि। दिवा मा स्वाप्सी
राचार्याधीनो वेदमधीष्व। द्वादशवर्षाणि वेदब्रह्मचर्यं गृहाण वेति वदेत्॥

वेदग्रहणं कथं। वेदमात्रस्यायं कालनियमस्यादिति। मंत्रब्राह्मणयोर्वेदनामधे
येन महानाम्न्यादीनां व्रतानामर्धं द्वादशाब्दः स्वयः संवत्सरस्यः। एवं व्रतस्योप
नयनप्रभृति षोडशे वर्षे गोदानसिद्धिः। वेदग्रहणादयमर्थो लब्धः। एवमे
कं॥ अन्ये त्वनुजन्मप्रभृति षोडशे वर्षे गोदाने। वेदग्रहणान्ते वा ब्रह्मचर्यं सुव्रति।
प्रागर्धं वा द्वादशवर्षीत्यः एवं ब्रुवत त्रिविधं स्नानं प्रदर्शितं। विद्यास्नानं वि
द्याव्रतस्नानमिति। यः प्राग्द्वादशवर्षेभ्यो वेदमधीत्य स्नाति स विद्यास्नात
कः। यस्तु द्वादशवर्षाणि ब्रह्मचर्यं कृत्वा अनधीतविद्यः स व्रतस्नातकः। य
१२६ स्तु द्वादशवर्षाणि ब्रह्मचर्यं कृत्वा अधीतविद्यास्ति स विद्याव्रतस्नातकः। १२६
ननु विद्यान्तगुरुमर्थं नन्विमंत्रस्नानमिति। अतः कथं व्रतस्नातकस्य संभ
वः। उच्यते॥ विद्यान्तमिति॥ न विद्यापरिसमाप्तौ स्नानं चोद्यते॥ किं तर्हि विद्याया
अन्ते तेन स्नातकोऽपि मध्यमत्वरज्यं। तमारण्यकमधीत्य स्नायात्। रहस्य वार

ण्य कश्यपा न्येन स्नानिमित्तं चोद्यते। न ह्यनधीय स्नातको भवती त्यादि।। शौनकः।। कालं च ब्रह्मचर्यस्य त्रि। पायो यदि स्त्रो दथेति। ततः स्वि ष्टकृद्धादिहोम शेषं समाप्य भिक्षां यावेत्। अत्रसार्वत्रायिन सप्तत्या रत्या पिनीया ग्ने भिक्षेत। तत्र भवत्सूर्वी भित्या दिकल्प स्थानेतर हृष्टो विधिः।। कर्तव्यः। अतएव देवलः। भव तीतिपदं यौ स्त्रा भिक्षां देहीति वा चयेत्। या या भि त्वा तत्तो भिक्षां गुरवे सम्प र्पयेदिति। शौनकः।। भिक्षोत्पात्र हस्तः सन् आप्य आप्य न ददति वं। अग्ने भिक्षे त ऽनन्तर अत्र सार्वत्रायिनीच या। पश्चात्पितरमन्ये पिये वासु बों धवा स्ततः। आमे धाज्ञननाद्र स्तत्र मो पन यनान लं। तत्रैव सायं प्रातश्च समिधं जुहुया दसवितिं।। ।।इत्युपनयनं।। अथास्त मितं ब्रह्मो दनं।। सायं संध्या मग्निका र्यं वदा वा कृत्वा आचार्यः ब्रह्म चारिणा दक्षिणात उपवेश्य तिथ्या दिकं संकी र्त्य। अस्य ब्रह्म चारिणो प्रज्ञा श्री सादि सिद्धि धन वे दस माप्यर्थं मेत दद्यि

कारशाग्नेयचरुश्रपणान्तमेतदनुष्ठाय स्वाधिकारशाखेच श्रपणान्तमेतदनुष्ठाया
स्वाधिकारशाखेव ब्रह्मौदनं करिष्ये॥ तत्र आधानमाघारान्तं कृत्वा तत्र प्रधा
नदेवताः सदस्पतिं सावित्री ऋषीन् । एताः प्रधानदेवताः चरुः श्रपणं स्विष्टकृ
117 तमित्यादि पूर्णपात्रनिधानान्तं कृत्वा निर्वापप्रोक्षणोत्तरं तस्मै स्वः । विप्राणां भोज
नाय ज्ञायच्छितं निर्वापप्रोक्षणेन पाक यद्दविधानेन श्रपयेत् । शौनकः । चरु
पवेत्सर्वथैव कर्तुः स्थाल्यां मनसा कुर्यात् । तदादेतदर्थं तद्वचुः कश्चित्तत्यमाचे
रेत् । अथ वेदापयेच्छिष्यं भक्तो ब्रह्मौदन इत्युरिति । भक्तपाके । ततो आरभ्य
२१७ त्पचारिणे मरुवाज्यसंस्कारा आघारान्तं कृत्वा प्रधानहोमं कुर्यात् । नाश्नीव[illegible] २१७
साग विधिरिस्त्क मन्त्रकमणि वाया प्राणे वा । सावित्र्या द्वितीयमित्यस्मिन् रूक्षेसा
वित्र्यन्तरूपं उत्तरार्थं । अत ऊर्ध्वं मपि महानाम्न्या दिव्रते पुनर्घृते तेन द्विती
यं जुहोति । एतदुक्तं भवति । महानाम्न्या दिव्रतवर्णितेषु अनुप्रवचनीयहोमः कार्य ॥

तत्र सावित्रीस्थाने माहानाम्नीभ्यः स्वाहेति। महाव्रताय स्वाहेति। उपनिषद्
भ्यः स्वाहेत्या जुहोति त्रयं द्वितीयं जुहोति। अन्यत्समानं द्वितीयग्रहणं महानाम्न्या
दि। नामधेयेन होमार्थं सोपि हाहा तं चतुर्थमिति सूत्रे। चतुर्थमेव स्विष्टकृ
न्नवमं। तेनाज्यभागौ न भवतः। शौनकः॥ ततोवदानधर्मेण अवदाय हविः
र्जुहोति। सदसस्पतिमित्यस्य काण्वो मेधातिथिः सदसस्पतिर्गायत्री। प्रधान
चरुहोमः।९। तत्सवितुरित्यस्य गाथिनो विश्वामित्रः सविता गायत्री॥ चरुहो
मः।१०। ऋषिभ्यः स्वाहेति।११। स्विष्टकृदादि समाप्य ब्राह्मणान्भोजयित्वा
वेदसमाप्तिं वाचयेत्॥ ॥अथ ब्रह्मचारी॥ अक्षारालवणाशी ब्रह्मचारी
अधःशायी त्रिरात्रं द्वादशरात्रं संवत्सरं वा स्यात्॥ तिलमुद्गमाषदन्तेक्षिष्वं
क्षारसं गोधूमयोद्रवः॥ चणकादेव धान्यं च एषः क्षारगणाः स्मृतः॥ अथ कालिका॥
यदा द्वादशरात्रं स्यात् तत् मध्यमं तथापि वा। तदा तदन्त एव स्यान्मेधाजननं स्मृतं

तस्मिन्नह्नि ब्रह्मौदनचरुश्रपणायो मध्येच घनच्छायो भवेत्तदा पुनर्मौञ्जी
बन्धनं कार्यं तस्मात्तदानीं कायायासत्यां दिवैव ब्रह्मौदनं चरुश्रपणं कार्यं । त
स्मिन्निर्विघ्नेन ह्येसती जातेप्यनध्याये ब्रह्मौदनं सायं संध्यामुपास्यैव का
र्यं ॥ तथा च स्मृतिः ॥ ब्रह्मौदनं पचेदह्नि दह्नि पञ्चमन्त्र उपनीतिहोमे त्वनध्य
यदोषो नास्ति ॥ संग्रहे ॥ न संध्या गर्जितेवाले नवर्षे न्यून्यान्न दूषिते । ब्रह्मौ
दनं पचेद्यत्नोपाकर्मण्यनिवर्तते ॥ ॥ इति ब्रह्मौदनं ॥ अथ व्रताङ्गहोमे धाजन
११८ न कार्यं ॥ तेनेदं गृह्यसूत्रं ॥ अनिन्दितायां दिशि पर्णकल्पलाशकुशान्वस्तं बि ११८
वा पलाशोपचरन्ति । अथानिन्दिताया दिशः ॥ कारिका ॥ आग्नेयी दक्षि
णा नैरृत्याः । एतादिशो वर्ज्याः स्मृताः ॥ अन्यस्त्वप्यामनिन्दितायां दिशि स्थि
ता पलाशो गृह्येत् ॥ पलाशोपचार इति । पुनः पलाशाग्रहणादेव कर्म...

निमन्त्र्य द्विजान्स्वापयेत्कुशास्तरेषु वा। आचार्यस्य तिरूपणं वा। कुर्याद्विप्रेश्व
त्वा वेदिस्तर्पणोद्धाद्दशां गुल्मांशे जोगाय च जनेशावेगेन स्वांमेधां समर्पयेत्॥
इष्ट्वा निवेदयेदन्नं सकुम्भं सपावकं। समोदकं निवेद्या जपून्वत्स्य
न्नर्ववत्सा प्रणम्य तस्यैव मध्याये विज्ञीनिः सोरये जुलो उद्धार स्तु श्रवो मंत्रे
गृह्य प्रदक्षिणां। संप्राप्य तां नमस्कृत्य तथा कुर्यात्पुनः पुनः। एवं त्रिवा
र मावर्त्य दंडं जिन कमंडलूंस्तु। वेद्या निक्षिप्य चरुमो त्वा वासमीचवि
निक्षिपेत्॥ मेखलां यो पवीतं च घृत्वान्यानि विनिक्षिपेत्॥ अथ प्रयोगः।
आचम्य तिथ्यादिकं संकीर्त्य॥ अस्य ब्रह्मचारिणः श्रुताधीतधारणा
शक्तिसंपादनेन वेदनिधिपालनाखिलविघ्नमनोरथसिध्यर्थं मे
धाजननाख्यं कर्म करिष्ये। इति संकल्प्यानन्तरं पलाशायजनं षो

ऽष्टगोपचारैः करिष्ये। ततो नवतंतुभिः पलाशदण्डं सूत्रयित्वा॥ अथ शौ
नकः। गत्वाथ स स्वपुरतः पुण्याहं वाचयेद् द्विजैः। स्नापयेत्पुण्यसलिले
119 अलंकृतमनुस्मरन्। ततो मेधाजननं पलाशायेति मंत्रेण षोडशोप
चारान् कल्पयेत्। आवाहनादि विसर्जनांतं। ततः प्रदक्षिणत्रिः सिंचन्तं व
टुं सुश्रवः सुश्रवा इति मंत्रमावाचीवाचयेत्। ऽयोगपारियातवे। वास
सीति स्वयुक्ते मेधाजननकर्मणि। दद्यात्तावत्स्वस्त्येव वर्तोपीनेनजवद्विति। ११९
११८ ततो विप्राः। ततो विप्राः मेधामह्यमिति सूक्तं जपेयुः। आलभ्य ऽथो हिरण्यद
त्वा नमस्कुर्यात्। इति मेधाजननं। दंडकोत्थापनविधिः। विवाहे नाः। अथ
पुनरुपनयनं। कारिका॥ वेदांतरमधीत्यैव ऋग्वेदं यत्त्वधीयते। उपनी

नारियं तेषामलं वस्त्रणवर्जिता॥ अमवारिव्रतलोपश्च। पुनरूपनीतिः शातातपः।
स्नानं गजमप्याप लोड्वू तथाप्युनं॥ उष्ट्रमानुषकेनाध्यरासभीन्नीरभोज
नाश्च॥ उपायनं पुनः कुर्यात्त सहबुत्रं चरेन्नुडः॥ अन्येषु स्नास्थानरोकं निमि
त्तेषु च स्नानमाः॥ तत्र विशेषः॥ नैमित्तिकमनध्यायं त्रल्लसं च प्रतिपादितं। मे
खलावं घनेप्रायश्चित्तार्थं मुनयो विडुः॥ सप्तमी माघमासस्य तृतीया
चाक्षयातथा। युगमन्वादयश्चान्या अतवंधे पुनः शुभाः। तत्र वपनं हत्र
ताहतं। मेधाजननं च। अतुशवव नी यहो मध्या। सावित्र्या स्थाने तत्सवितु
र्वरेणीमह इति। पुनरूपनयनं॥ अथ ब्रह्मचारी धर्माः। कार्ष्णीरौरवे त्यादिस्मृ
तौ कामेवा। स्कंदः। यणेयं रौरवं वास्त्रं क्रमाच्चर्म द्विजन्मनां। मौंजीजिह्वस

माम्लदण्डोश्वत्थमेखला। त्र्युं जाभावे तु वार्क्षं व्या दंडा यज्ञियद्रुमजाः। ते
केशान्तललाटनासां तप्रमाणाः क्रमाद्विजैः। आमूलच्चाललाटं च नासा
120 ग्रं च प्रमाणतः। ब्रह्मक्षत्रविशां दंड स्वगाद्यो नाभिनिर्दूषितः। व्यास
शिखोल्ललाटनासाग्रप्रमाणा वर्णतः क्रमात्। याज्ञिकस्य तु दैर्घ्य स्पंद
नर्हति धर्मतः। इति दंडलक्षणं। जीर्णकमंडलुं दंडमुपवीतांजिने अपि।
२२० अप्स्वेता निर्विनिक्षिप्य गृह्णीनानपान्मंत्रवत्। धार्यो मल्लस्याप्सदा धा २२०
र्यं कौपीनं कटिसूत्रकं। कौपीनमहतं यं त्वाग्निहुतक्षुत्कवाससाः। स्वयं
स्तु वाहतं धार्यं खंडं वा वस्त्रपार्श्वयुक्।। अथारंध्यानिर्णयः। तत्रापस्तंब
उपायनोक्तिकर्तव्यं सायं संध्यारूपासनं। आवरेऽकुलयतं तु मध्याह्नेऽनुपरोहनी।

आपतिः॥ प्राप्य देवीं च गायत्रीं गुरोर्मुखेवानुशासनात्। संध्याचरणं तु कर्तव्य
सायमादि यथाक्रममिति॥ अत एव कारिकायां॥ अहन्योपनीतस्तिष्ठेत्सा
यं संध्यामुपास्य चेति। यो नवोपिाल्लब्ध्वा विद्यायगुरवेतत्प्रार्थ्येतं निधाय
चान्तसंन्निधावचुपलस्तिष्ठेद्यादिवसस्ययात्। सायं संध्याविधिं कृत्वा
पथोपनयनानन्तरे। आधायपसघृतं तस्मिंस्ततो चाधानपूर्वकं। अग्निः।
संध्याचरणं कर्तव्यं यावन्नैवोपनायनं। उपायनदिनारंभ सायंप्रा
तश्च कालयोः। मध्याह्ने च कर्तव्यं यावत्तीणविमोचनमिति। पुनः शौनकः।
अग्निश्चेत्यनुवाकेन सायंकाले त्वपः पिबेत्। सूर्यश्चेत्यनुवाकेन प्रातःका
लेः पिबेदपः। आपः पुनन्त्वित्येतेन मध्याह्ने त्वा विशीर्णयादिवं वसंस्म

त्य सायासीनोजपेन्नरः। सायंगानश्च मध्याह्ने सावित्रीं जपन् वाग्यतः। सा
येप्रत्यङ्मुखश्चैव तिष्ठेत्प्रातः प्राङ्मुखः। सायं प्रातश्च रूपस्थाय जानवेद स
इत्येवेति। अन्यच्च भोजनात्प्रागेपि मध्याह्नसंध्यायाः कर्तव्यत्वात् श्रयनेष्वा
त मध्याह्नसंध्याविधानं स्मृतिकारादिभिर्भोजनात्प्रागेवोक्तं नेस्मा
दुपयनं दिने मध्याह्नसंध्योपासनं नेति गम्यत इति। ब्रह्मचारिणां तु भो
जनं कृतमस्ति। भोजनादुपर्युपनयनस्य विहितत्वादिति। अतः कारणा
२३१ दुपनयन दिने मध्याह्नसंध्यानुष्ठानं वेति प्रतीयते। दण्डाजिनोपवीता २३२
पाय्यरभैक्ष्यं यथोदितं। वेत्रेन। याव यथाविततं वान्नं त्रिधा हत्वैक
मानन। अग्नौ व्याहृतिभिर्हुत्वा पयभागमेवं गुरोरपि। एवं तु जीनमतिमा

स्वाध्यायं च ततः पठेदिति। कारिका। उपाकरणपर्यंतं सावित्र्याव्र
तमयज्ञकमिति। पुनः स्मृत्यर्थसारे। अग्निं चैव द्विजगृहे भैक्षं चरेत्।
गुर्वाज्ञया भोजनविधिना भुंजीत। गुरुशुश्रूषणं वेदसाधनार्थं
कुर्यात्। व्रतसमयः प्रयुक्ताः। नग्नस्त्रीमधुमांसोच्छिष्टशुक्तपर्यु
षितानांकृत दंतधावनादर्श[illegible]पादिवास्यापछत्रपादुकागंधमा
ल्योद्वर्तनानुलेपनांजनजलक्रीडाद्यूतनृत्यगीतवाद्यालापाश्ली
लपरिवादादीनां सर्वमावर्तनाद्वर्जयेत्। याज्ञवल्क्यः॥ मधु
मांसांजनोच्छिष्टशुक्तस्त्रीप्राणिहिंसनं। भास्करालोकनाश्लील
परिवादादि वर्जयेत्॥ मधुक्षौद्रं उच्छिष्टमगुरोरभोज्यं कृत्स्नं निष्ठुर

वासवा। अश्लीलमसत्यभाषणं। आदित्यदर्शनाद्यादीनि। यज्ञोपवी
तमजिनमौञ्जीदण्डं च धारयेत्। नष्टे भ्रष्टे नवं मन्त्रवद्धार्यं त्यक्तस्याप्सु निक्षि
पेत्। सर्वव्रतान्ते यज्ञोपवीतादीनि त्यक्त्वा शिवाणि त्यक्त्वा वस्त्राणां त्या
गो अभिमन्त्रणं:॥ इति ब्रह्मचारिधर्माः॥ ॥अथ वेदव्रतं॥ उदगयने
भुक्तेषु पक्षे पुण्याहे। आचार्याः परिदधामि त्वां नमुपनयनवदहोत्रा
मेखलादीनि नवानि गृहीत्वा ज्वलनोदकं गृहीत्वाग्निमभिमुखे
त्वं व्रतानामधिपतिरिति जपेत्। त्वं व्रतानां व्रतपतिरसि व्रतं चरिष्यामि तत्
केन यनेनराध्यासं। ततः स्थिरप्रदादि समापयेत्। यथाकालमु
पाहृत्य वेदमधीत्य व्रतान्ते अनुप्रवचनीयं सर्वं वत्। कुर्यात्। ते

गा॰ वे॰ ष॰ स॰ ----- इति मणिदर्पणोक्तं वेदव्रतं ॥ अथ महाना

म्नीव्रतं ॥ अस्य ब्रह्मचारिणः समस्तपापक्षयद्वारा परमेश्वरप्रीत्यर्थं

महानाम्नीव्रतं करिष्ये तदाधारां तन्तुरुक्तां न्निं पवमान ३ अग्नयंतो ४ ।

अनुमतो ५ इदातारं ६ अग्निं ७ वायुं ८ सूर्यं ९ हुसरान् १० अपात्स्वि

ष्टकृतमित्यादिना महानाम्नं तत्राचार्यो वदति ये आ धारावाहसेन

ह्यंतमुक्ता ह हस्तस्पर्तिं महानाम्नीः ।२। सचीन् ।३। एतान् यरूप

स्विष्टकृतमित्यादि । एवं महाव्रतमुपनिषद्व्रतं च । गोदाने चोक्तं एव ।

उपनयनवद्दा स्पृश्य मेखलादि स्विष्टकृतादि समापयेत् ॥ का

रिका ॥ नवां मौञ्जीं नवं दंडं दत्वा स्विष्टकृदादि यथा सैव क्रमेवरे देवं स

र्णो हेतुत्तरायणे। इति वर्षवृद्ध्यां माघादि निष्क्रम्य देवनघा शेषिविले दे
वेमे स्योपत्ने पनादिग्नि पौत्र निधानां तेहुत्वा होमा यस्य भोजनायात्
तुल्लीं निरूप्य तिलान्नाशि पय पचेत्। अथायार्थी व्रतलोपात्तरुद्र। बहु
व्रतलोपे तु व्रतमावर्त्ययेत्। आपत्ति नावर्त्ययेत्। तथा च कारिका। बहवो
व्रतलोपाश्चे त्पुनरावर्त्ये व्रतमिति। अथान्याधिपयणा घा घारांतं हुत्वा
ग्नावग्निरिंद्रइत्यादि मंत्रैरव दान धर्मेण चवीं जुहुयात्। ते मंत्राः।
१२३ अग्नावाग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अधिराज एषः। तस्मै जुहोमि १२३
हविषा घृतेन मादेवानां मोमुहद्भागधेयं मोअस्माकं मोमुहद्भाग
धेयं स्वाहा।१। यास्ते रक्षीनि पद्यते हविधारणी इति। तान्या घृतेन धारया

यजे स्वराज्य नी महं स्वाहा ।२। यस्मै त्वं काम कामाय वयं सं म्राड्यजामहे ।
तमस्मभ्यं कामं दत्वाथेदं त्वं घृतं पिब स्वाहा ।३। अयं नो अग्निर्वरिवः
कृणोत्वयं मृधः पुर एतु प्रभिंदन् । अयं शत्रुञ्जयतु जर्हृषाणो यं वाजं ज
यन्तु वाजसातौ स्वाहा ।४। अस्त्रपत्यै वान्नुमत्यै स्वाहा ।५। प्रदागे स्वाहा ।६।
ॐ भूः स्वाहा ।७। ॐ भुवः स्वाहा ।८। ॐ स्वः स्वाहा ।९। नात्र समस्तव्याहृत्या
होमः । व्याहृतिभिः पृथक् पृथगाहुत्यो त्रिस्त्रः प्रथग्रहणात् । एतैर्मंत्रैः प्रसरं कृ
त्वा स्विष्टकृतान्नमव घटे स्थापं बर्हिषि निधाय ब्रह्मचारिणे प्रत्याहारा यः ।
एतं स्थालीपाकं सर्वत्र ज्ञातव्यं । कारिकायां ततः स्विष्टकृतो व घेद्धे
षं भूमौ निधाय च । एतेभिः स्थाली ज्ञानानंतमाह शेषमनः परामिति । उक्तं च

तस्मायांतं जलपूर्णांजलिं त्वद्व्रतानामित्यादिस्तुक्रवणद्धु आदित्यमुप
स्थाप्यार्घ्यं दत्वा चक्षुरुन्मीलनं कृत्वा मौनं कुर्यात्। त्वं व्रतानां व्रतप
तिरसि व्रतं चरिष्यामि तच्छकेयं तेन नश्यकं यतेन राध्यासमिति॥ अथ
124 शौनकः॥ अग्नावग्नाश्चरतीत्यादिमंत्रैः पञ्चाहुती ततो व्याहृतिभि
र्व्यस्तसमस्ताभिश्चतस्र आहुतीः कृत्वा ततो वदायानं किंचिद्विष्टहस्ते
१२४ स्रुचिं तां निधाय तिलान्वस्त्र समास्तीर्णं तु बर्हिषि। ततः शिष्यं गु १२४
रु ब्रूयाद्धुतशिष्टमिमं चरूं। सर्वं भुक्त्वे तु भुंजीत होमशेषं चरुं शनैः।
उच्छेषेण मपां पूर्णमञ्जलिं दद्यतं स्थितं। तमुपस्थापयेच्छिष्यं त्वं व्र
तानां व्रतादिना। मंत्रेणानेन राध्यासमिति सं तेन दिवाकरं। कुर्यात्स

3

पवनन्मंत्रं गुरुः शिष्यं श्रावयेत्॥ अथ ब्रह्मचारिणोऽहतेन वाससा शिरः प्र
दक्षिणं शिरसं [blot] मुखं वेष्टयेत्॥ अथैकरात्र एतं कालं एतं व्रतं तन्तल्लेप्य
पन्॥ भवेत्याचार्यः शेषं ब्रूयात्॥ ब्रह्मचारिणा त्वया भवितव्यो ततः स्थि
ष्टह्रदादिकारिकाय॥ उक्तैकरात्रमित्यादि शेषं स्थिष्टह्नयथा॥ आवश्य
के स्पष्टत छयनासनभोजनं॥ अकुर्वन्नेकरात्रं ब्रह्मचारी नयेदथोति॥
अथ शौनकः॥ एकरात्रं त्रिरात्रं वा नमेवं व्रतं वेष्टयेत्॥ आसीनस्यापही
नस्य समभ्यासवच्चेरिति॥ अपरेद्युमेंत्र स्नानसंध्यावंदनादि कृत्वा इ
ष्ट्वान्यां दिरूपग्निं प्रतिष्ठाप्यालंकृत्वा उदकुमंऽल्कुकुम्भस्तोग्ने हुत्वा
ब्रह्मचारी वायव्यां दिशि बध्नाग्नेः पश्चादाचार्यः॥ प्रागग्रेषूदर्भेषूपविश्य

ईशानीं दिशां समीक्षणो ब्रह्मचारी मुखं प्रक्षाल्य: । गत्वा वायवीं प्रदक्षिणीकृत्य
निवाघ पश्चात्तं शुने कौनीं दिशामीक्षमाणा उपविष्टो ऽतू । स्वेन स्वेनाचार्य
प्रश्नं संध्याय मनसा महात्मा नालीर्जो ऽनुज्ञं हितं गुरुः समुदीरयेत् ॥ ० ॥
135 अथ शौनकः । अपरे घस्य चतुर्थ वादिवसे प्रयतो गुरुः । अनुवत्स मुहा
नाम्नीं स्वागोरापे दयादि द्विजो । पूर्वो ह्यरामन्तु प्राप्ता दक्षो ग्रामा बहिः पूर्वे
भूदेवालये तत्र कृत्वा स्थंडिलमादितः । - - - - ममप्रणि सलिलं च कमं
१२५ डलुं । स्वस्य वत्स तरीं बध्वा तस्याग्रे चलगुच्चरे । ततो ग्नेः उत्तरगास्तीर्थ १२५
दर्भ ह्येग गुरु चराका तत्र तेषां तीत गुरुः पञ्चपत्रा कुदीचीं दिशांततः । शिष्या
पि हुत्वले पादीन् प्रमज्ज वाम्पवो दवं । हां स्वागुरो श्च वन्दे स्वय दक्षिणाम

थोगुरुं। अभिवाद्य गुरोः प्रत्यग्दक्षिणेन स्यपृष्ठतः। तस्यैवासनदर्भाणां
सम्लिष्टोव चनैर्कृनीम्। विलोक्यादित्यमासित्वा ततः पृष्ठेन चात्मनः। आ
चार्यस्य चसंयोज्यव चनं मनसं ततः। उदीरयेन्महानाम्नी नो अन्वि
त्येवमादिकां। ओं ह्रीं त्यं तमथावा चोज्ञायाकालप्रमाणतः। अथगुरुः
शिष्यं तदहरुत्से नाच्युतलोपान्पृष्ठततः समीलनं कुर्वन्। त्रिः पुरीष
पदैः सह महानाम्नीस्त्रयः शिष्यञ्च लक्ष्यशिरोवेष्टनं मोचयेत्॥ क्रौ
नकोपि विहामघवन्विदा गातुमिस्यापकमसंयुताः। ता महानाम्न्य इत्यु
क्ताः पुरीषपदसंज्ञकैः। एवा ह्येवादिभिः सार्धं समीक्षितविलोचनइति।
ततोमित्रस्यति मंत्रड्यचनाद्यायं तं शिष्यं रविमीलयेत्। मित्रस्यचा

वस्कषा। अग्निपत्न्यापोस्म। द्वेष्टि यं च वयं द्विष्मस्तं वस्कषो हेतु ॠतु। मि
त्रस्य इति मंत्रेण ससंभारादि चोदीत्स्य तती ये न पुनरादि समीक्षये
त्। मित्रस्य च क्षुक्षपानुवीक्षे। मित्रस्या चक्षुषा समीक्षे। शौनकः।
अथास्यास्य शष्टिभिः संभारैः सहितादिक्षः। मित्रस्य त्वा चक्षुषादि
126 मन्त्रतः समग्गीक्षयेत्। मित्रस्य त्वादिकं मंत्र मच्छिद्य स्येवमंतिकं।
वाचयित्वा पुनश्चाकिं मीक्षयेदथ गाव्नभा जितिना ईक्षणेकि दिशामे १२६
१२६ गाच्छन्न चारिण एव च। अथ पश्मीस्य छागा अगन्द्ध ख्याद्दीन्मंत्रान्जपे
त्। एष जपः इष्टोद्देयः। अथ प्रवेदवदन्तु प्रवचनीय तो मंत्रं जपेत्।
तगविशेषः। सावित्रास्थान मत्तानाम्नी स्वस्याहेति अथाहोम न्त्रोषं स

मापयेत्। शौनकः। इध्माद्या नाडिविद्येन स्विष्टकृत्याप्युरस्तनं तत्र शेषं प
श्चात्याय मवदाय चरुं ततः। चतस्रो वाहुतीः कुर्याद्यथा ब्रह्मौदने पुरा। ब्र
ह्मौदनवेदत्रापि होममं त्रास्तु रच्च नु। महानाम्नी त्यष्ट त्यष्टि ति यो मंत्र इ
ष्यत इति। अथ यथा रिका। पूर्ववद्व्रत आदिष्टे संवत्सरमिदं चरेत्। पूर्णे
संवत्सरे देवो विविक्ते उपविश्य च। प्राङ्मुख आवयेदेनं महाव्रतमतः परं।
अनुप्रवचनीयांतं कुर्यादर्केक्षणादिकं। महाव्रताय स्वाहेति सावि
त्र्या स्थाने इष्यत इति। एवं चैव वटुपयन्नेहोमं हुत्वा संवत्सरं व्रतंच
रित्वा पूर्णे संवत्सरे विविक्ते देशे अनुप्रवचनीयं चरुं श्रपयित्वा महा
व्रतस्यपर्यायविंशति साममंत्रः। एषपर्यायएत कर्म। इत्याचार्यश्रीनावये
त्। अथार्कावेक्षणांतं कृत्वानुप्रवचनहोमं कुर्यात्। सावित्र्यास्थाने महा

व्रतायस्वाहेति कृत्वाहोममन्त्रोषं समापयेत्॥ कारिका। पूर्ववद्व्रतआदि
ष्टं चरेदस्मिन्दव्रतं। श्रावयित्वोपनिषदमादित्यावेक्षणादिकं। अत्रो
पनिषदेस्वाहा सावित्र्यास्थाने इष्यतइति। शौनकोपि। आचार्योथात
स्त्याघाहुतीयारेण्पकमृतिः। विद्गु भ्योपनिषदं नर्ववद्याकर्मीदये
दिति। यस्त्वपणांतं हुत्वा। अथातः संहिताया उपनिषत्। इत्याचार्यः श्रा
वयेत्। आदित्यावेक्षणादिः। अभिसं स्पर्शनांतं हस्तानुप्रवचनीयहो
१२७ मं कुर्यात्। तत्र सावित्र्यास्थाने उपनिषदेस्वाहेति कृत्वाहोममन्त्रोषं समा १२७
पयेत्॥ इत्युपनिषद्व्रतं॥ ॥अपणोदानं॥ ॥बोलवेवर्षकार्यं। तत्स
र्वं वेलत्वचन्द्रयोगः। गृहमलहस्तस्वर्वैघनंदीश्राद्धं अपरेचानिर्दिष्यके

र्गान्तेरा अस्य ब्रह्मचारिणः वेदोक्ताभिज्ञापार्थं नित्यविधिरूपं गोदान
ख्यं कर्म करिष्य इति संकल्प्य चौलवद्व्रीह्यादिभिः पूर्णपात्राण्यासाद्याघा
रान्तं कृत्वा चौलोक्तहोमं कुर्यात्। नव वद्धीनोक्तादि अत्र उं दनं चतुःश्म
श्रूणां भवेत्। मातुरंकोपवेशनं। नापितोदि विशेषः कथ्यते। अदितिः श्मश्रू
णि छिन्धि शिरो। सुखं मा म आयुः प्रमोषीरिति क्षुरधारां निमज्जेत्। केश
श्मश्रुलोमनखान्युदक् संस्थानि। अदर्शन कुशलीकुर्वीति। नापित
मनुशास्ति। शौनकः। तत्रैव केशश्मश्रुलोमनखानीति। पदार्थः।
उदक् संस्थानि कुशली कुर्वित्येवमुदीरयेत्। ततः स्नानोत्तरं समीपस्थेन
स्मिन्नेव स्थिपलदादिकं। उपविश्यानुतंत्रमाचार्यः समापयेत्। ब्रह्मच
र्याश्रमतो मायं नियममात्रादिवसस्य यावत्। विद्वेदसमितेस्तुर्ये गुरोरंति

पथ्यागतः। वरं ददामीत्युक्त्वाथ गो ब्रह्मो गुरवे दिशेत्। उत्तरेण कुर्यात्तस्य व
त्सतं ब्रतमादिशेत्। सर्वासु ब्रतचर्यासु प्रसिद्धं केशधारणमिति। द्विस्त्रींश्च
र्वं वपनं कारयेत्॥ ॥इति गोदानं॥ वपनकालः॥ वपनं प्रतिमासेषु ब्रह्मचारिणां
भवेदिह। मासद्वये यतीनां च विधवायाः चार्धमासिके। नित्यनैमित्तिकं का
128 र्यं वपनं शुद्धिदं भवेत्। कालग्राह्यं न कुर्वीत प्राजापत्ये दिने दिने॥ इति
वपनकालः॥ ॥अथ समावर्तनं॥ सर्वा विद्यां ते गुरुमर्थेन निमंत्र्य कृ
त्वानुज्ञातः स्यवाम्नानमिति। विद्यापरिसमाप्तो गुरुं अर्थेन निमंत्र्य कथं।अ
१२८ हं ते कमर्थं करवाणीति पृच्छेत्। स यमर्थमाह तं कृत्वा स्नायात्। त्रिविद्य १२८
स्नानमुपनयनं प्रवचनं त्रिराणं द्वादशरात्रं मित्यक्षो कृ। तत्र नक्षत्राण्यु
च्यंते। वागीशादिति सौम्य पौष्णादिन हस्तमित्रोत्तरारोहिणीगोविंदेषु का

वक्षसु गंधस्य सुपानकर्मदंडं सजं सुन्मर्दनमनुलेपनमांजनं सुत्रीयमिता तेन चोचार्य

शां कर्मानुष्ठानं विष्णु कांत्रावारादिष्णु । दिक्षां पर्वतथाष्टमी प्रतिपदं मेषं वृषं हरिं हित्वा अधितु तेतथाद्धि विमले कुर्यात्समावर्त्तनं । इदं कर्म स्वसमे वकुर्यात् ॥ अथ शौनकः ॥ विधाय याज्ञदयव शाद्धं सर्वं घकरपरेहनि । प्रातः समिधमाधाय व्रतस्य स्नयनो द्विजेरिति । अथ सूत्रं । मणिं कुंडलं [illegible] यै वेति । अस्यार्थः ॥ मण्यादी कुसुमं तानि आत्मने आचार्यायचोपकल्पयीत । यद्यनयोर्न विंदेत नलभेत । तदाया यां चैव वकल्पये द्वावि दुरलाभ इत्यधातीतः । विंदेतेति रूपं प्रागुदीच्यां दिशं गत्वा यज्ञियवृक्षस्य शाखामेव गताग्रा स्वात्मस्याः समिधमानीयन्मे रत्नेत्रे निदध्यात् । तत्रेदं गत्वरत्नं ॥ आज्यं उभयकाम इति । अन्नाद्यकाम आज्यं माहरेत् । ब्रह्मवर्चसकामस्तु पवातां कामिस्यर्थः । उभयकाम उभयीमाहरेत् । अर्थश्च

दधि मधु वा भवन्ति । अन्वं शरणं ॥ वा दर्भ ।

बालमित्यर्थः। यज्ञियवृक्षाः स्थालीपाकः ठक्षाः॥ अथ प्रयोगः। तत्रादौ नवः। दत्वा
नं गां च विप्रेभ्यः कर्म गोदानं चेदिति। तिथ्यादिकं संकीर्त्य ब्रह्मचर्यव्रत स
मार्थं गोदास्ये ब्राह्मणभोजनं च करिष्य इति संकल्प्य। गां दत्वा ब्राह्मणा
न्भोजयित्वा कौतुकबंधनं कृत्वा मुहूर्ते तिथ्यादिकं संकीर्त्य। मम भा
र्यायाः परिग्रहार्थं समावर्तनाख्यं कर्म करिष्य इति संकल्प्य। उपलेपना
129 द्यग्निप्रतिष्ठापनांतं कृत्वा पुनर्देशकालौ संकीर्त्य मया क्रियमाणे स
१२८ मावर्तनहोमे चाधानं करिष्ये देवतापरिग्रहार्थं मित्याघारांतमुक्त्वा १२९
त्रिवारमग्निं पवमानं प्रजापतिं चाज्येनाग्निमर्द्धं समिधा विश्वान्देवा
न्समिधेनेत्याद्याघारांतं कर्म कृत्वा चौलवज्जातकर्म आज्याहुती द्वे चौरी
तो स्थालीपाकादिकं सर्वं चौलवत्। विशेषो लिख्यते। अदितिः श्मश्रूणि वपत्विति।

त्रायस्वमां। मामा हिंसीः। वपतेदं। यथास्ता। तेनम आयुषे। वप्तावपसि। श्मश्रू
णि। छिन्धि। शिरो मुखं मामआयुः। अवर्थं कुर्वाणः। वेद्या। श्मश्रुलोमनखा
न्युदक्संस्थान्यक्षण्व कुर्याली कुरा। मून्। एक क्लीतकेन तिउन्मर्दनं कु
र्वीते। ति। चोषः। करंज फलस्य यत्रैकवीजं तदेक क्लीतकं। तले बद्ध्वा। तेनो
न्मर्दनं कारयेत्। वीतो ष्णेरुदके स्नापयेत्। उदुत्तममित्यस्य भुनः। न्त्रो
पो विश्वामित्रो वरुणो त्रिष्टुप्। मेखलाविसर्जने। मनेकृकार्ये मितिकेचि
त्। युवं वस्त्राणीत्यनेनाहतेवाससी आच्छादयज्ञः स्यादित्युवेमवोकमं
त्रावरुणिनस्यात्। शौनकः। स्नात्वा वैवानि धाय स्वा। युवं वस्त्राणि
पीवसा। दत्या। घोत्सहः। घार्येत तौवस्त्रायुगं नवां। वसि त्वा। दकमा यमा

गृहीत्वा पाणिना जलमिति। वस्त्रे धृत्वाचम्य यज्ञोपवीतमिति यज्ञोपवीत
मसीति यज्ञोपवीते पुनर्यज्ञोपवीतमिति यज्ञाप्यथं। आचम्य। अचम
नीतमंत्रेण सव्यमसि अंजलीत। सव्यं मनुष्या अजानते प्रथमामिति श्रो
त्रे। ततो दक्षिणं। मंत्रा दक्षिणं स्यात्। अचमन नक्षत्रो सिरश्रोत्रं मयीति कुं
डलेव धारीति। आदौ दक्षिणे कर्णे ततः सव्ये। कुंकुमाद्यनुलिप्ताभ्यां
हस्ताभ्यां मुखं मनुलिप्य अंगान्यनुलिप्य हस्तौ प्रक्षालयेत्। वारि
१३० कौ॥ अथानुलेपनालिप्य पाणिभ्यां प्रथमं मुखं। अनुलिप्येतराण्यं १३०
गान्यनुलेपेनु पश्चिमां। ततो नानासीति विन्यस्तिः स्रज बध्नाति।
मालां शाश्वुं वर्जयेत्। देवानां प्रतिष्ठेस्त्वहमिति स्नापानहावास्था य।।

सहामंत्रः॥ दिवस्तु मा नयीति त्र्यृचं गृह्णाति। वेणुरसीति दंडं गृह्णीयात्।

आयुष्यमिति सूक्तेन मणिं कंठे बध्नाति। आयुष्यमित्येकादशर्चस्य सू

प्रथमपत्नीप्रज्ञां संत्यिज्य धर्माधर्मपत्नीस्याद्धितीया रतिवर्धिनी। दृ
ष्टमेव फलं तत्र नादृष्टमुपपद्यते। अन्यज्ञातिस्त्रियो मोहादुद्वहंतो द्वि
जातयः। कुलान्येव नयंत्याशु ससंतानानि शूद्रतां। कात्यायनः। स
दारोत्पन्नाः न दाराहोतुं कारणं तदांनू। यदि स्वेच्छेद्दग्निमान्कुर्वं क्रम
मोस्याविधीयते। स्वागमोवेव भवेज्ज्ञोमोलो किकेन कदाचन। ब्राह्म १६
१६६ ण यदि समाप्येकां भार्यां याद्वितीयं तथा। दत्नीयां नोद्वहेद्विप्र इति च
मोद्वहतो विदुः।। अथाग्निदपत्नीसंपर्कविधिः।। ।। प्राणानायम्य तिथ्या
दिकं संकीर्त्य आत्मभार्याभेदनिमित्तवंशाऽडो। तयोर्द्वयोराज्ञाः

पृथग्गृह्नयोः समेवनयोग्यतासिद्ध्यर्थं शौनकासूक्तप्रकारेण होमं करि
ष्ये। तदर्थमुपलेपनाद्यग्निप्रतिष्ठापनं करिष्ये। ततः पृथक्स्थण्डिलयो
रग्निं प्रतिष्ठाप्य पुनः संकल्प्य होमं करिष्ये। तत्रान्वाधानं करिष्ये। इ
त्यादिवत्स्रुची आज्येनेत्यन्तमुक्त्वाग्निप्रयाणदेवतानामाज्येनेति प्रति
ज्ञातकर्मणा सद्योयक्ष्ये व्याहृतीनोमिति। एवं आज्यभागान्तं कृत्वा
पूर्वपत्न्यग्नौ तया समन्वारब्धोऽग्निमीळे इति नवर्चेन सूक्तेन मे
वाज्याहुतीः कृत्वा सन्निध्याग्निं समारोपयेत्॥ शौनकोपि॥ पृथक्
स्थण्डिलयोरग्नी समाधाय यथाविधिः॥ तंत्रं कृत्वाज्यभागांतं

अन्वाधानादिकं ततः जुहुयात्सर्वं पत्न्यो तदाचारसूत्र आहुतीः। अग्निमी
ळे पुरोहितमिति सूक्तेन नवर्चेन तु। समिध्येनं समारोप्य अयं ते योनि
रित्यृचा। अग्निमीळे इति नवर्चस्य सूक्तस्य वैश्वामित्रो मधुच्छन्दा अ
ग्निर्गायत्री। उद्धान आज्यहोमे विनियोगः। ततः कनिष्ठिकाग्नेः प्र
167 त्यवरोहयेत्। प्रत्यवरोहेति मन्त्रेण उपायमनादिकं। हत्या पत्नी
स्यां समाचारसूत्रः। आत्मनः भार्याभेदनिमित्ते वह्न्याधानयोर्द्वयोर
ग्न्योः पृथग्भूतयोः संमीलनार्थं कार्यं अग्नित्वसिध्यर्थं शौनकाचा १६
१६७ र्यमार्गेण होमं करिष्ये इत्यादि चतुर्ष्वन्त स्रुक्का पञ्चारं अग्निं यथा
नदेवतां च तु गृहीत्वाज्यद्रव्येण प्रोक्षणं विष्टहीनमित्यादि आज्यभागां
तं कृत्वा अग्नावग्निश्चरति। अग्निनाग्निः समिध्यते अस्मीदमग्निं

थनमितितिस्त्रः। पाहिनोअग्न एकयेत्येका। एतैः षड्भिर्मन्त्रैराज्यकुतीर्के
स्विष्टकृदादिसमापयेत्। शौनकोपि। डात्यधेवरो हे त्येनयाकनिष्ठाग्नौ विधा
यतां। आज्यभागांतं तत्रादिह्न्यावारभ्यतदादितः। समेचार ध्रु एताभ्यां पत्न्या
स्यां जुहुयाहुतीं। चतुर्थहीन मेताभिर्भिर्भिः षड्भिर्यथाक्रमं। अग्नावग्निश्च
रतीत्यग्निनाग्निः समिध्यते। अस्तीदमितितिस्त्रभिः। पाहिनोअग्नएकया।
ततस्विष्टकृतादारभ्य होमशेषं समापयेत्। गोयुग्मं दक्षिणा दद्याद्ब्राह्मणा
याहिताग्नये। अग्नावग्निश्चरति प्रविष्टऋषीणां पुत्रो राजएषः। तस्मै जुहो
मिहविषाघृतेनमादेवानां मोमुहद्भागधेयं मो अस्माकं मो मुहद्भागधे
यं स्वाहा। अग्निनाग्निः समिध्यत इत्यस्य मधुच्छंदाग्निर्गायत्री। गधान
आज्यहोमे। अस्तीदमधिमंथनमितितिस्त्रणां विश्वामित्रोग्निरनुष्टुप्। अं

सोदे अनुष्टुभौ। प्रधान आज्यहोमे। पाहि नो अग्न एकः येत्य स्पप्रगाथो ग्निर्बृह
ती। प्रधान आज्यहोमे। एवं समाप्य ब्राह्मणान् भोजयेत्॥ ॥इत्यग्निहृदय संयो
गविधिः॥ अथ यज्ञानो चेहोमादिनिर्णयः॥ यजाहिताग्नेर्धर्मस्याक्ष औपास
निकस्य तु होमे मुख्याः स्युः पत्नी च पुत्रः शिष्यः सुता स्तथा। एतैरेव कृतं यत्तु त
त्कृतं स्वयमेव तु। असमक्षं तु दंपत्यो होमव्यन्तर्धिगादिना। द्वयोरप्यसम
क्षं तु भवेद्धुतमनर्थकं। संनिधौ यजमानस्याद्धर्हन्नत्यागकारकः। असं
निधौ तु पत्नी स्याद्दध्युर्यु स्तदनुज्ञया। उन्मादे घ सर्वे वा ज्ञौ कुर्वीतानुज्ञया
१६८ विना। कूर्मपुराणे। ऋत्विक्पुत्रो थवा पत्नी शिष्यो वापि सहोदरः। प्राप्यानु १६८
ज्ञां विशेषेण जुहुयाद्वा यथाविधिः। एतद्दृग्गादिनाहवनं पूर्वव्यतिरि
क्तविषयं। व्ययपर्वणीति सूचो क्तेर्वाच्यात्। आचार्यः। स्मार्ताग्निः स्वेनैव

वे स्वयं न जुहुयाद्द्विजः। श्रौताग्निस्तु सहस्रं हुत्वा समाप्यैवास्वयं कुर्वन्ति

नोऽग्निरात्मनोऽन्येषामभावे स्तुतवादिष्ट॥ आरोपयेद् वनं ते षु निःहरेत् जुहुयात्

स्वयं। अतीताहुतयः सर्वा हुतैव निष्कृतिर्भवेत्। इति गृह्यकर्म हीनेस्तु कार्यात्

निष्कृतिर्भवेत्॥ अतितद्वादशाहेतु प्रणा कृत्य स्तु कं कुर्यात्। प्रायश्चित्तमाचरेत्ततो

हुत्वा गार्हपत्याग्निर्विनश्यति। न ज्ञातं श्रौतं वेत्स्यतां श्रौतं वेद ताग्निसाध्योदर्श

पौर्णमासाद्यानि स्मार्ते मिश्रकाः। कार्याः। औपासनाग्निसाध्याश्च सायंप्रा

तर्होम पार्वण स्थालीपाकाद्यानि स्मार्ते मिश्रिकाः इति चोदित्वा कार्या एव।

असंभवे हाव्ये सर्वथा न हापयेत्। स्मार्ते त्वपि पिंडपितृयज्ञश्रवणाकर्म

च शुल्कीकर्मादि कं समगोत्रेण कारयेत्। न तापयेत्। सर्वकार्यं बंनर्जमेव।

दानमप्रति ग्रहपंच महायज्ञनित्य श्राद्ध स्मार्तानां त्याग एव॥ होमं न त्यजेत्॥

न त्यजे सूतके वापि त्यजन् गच्छेदधो द्विजः। याज्ञवल्क्योपि। वैतानोपासनाः का
र्याः क्रियाश्च श्रुतिनोदनात्। वैतानाः श्रौताः। औपासना स्मार्त्ताः। निषेधस्तु का
म्यहोमए वा। तथा च ब्रह्मपुराणे॥ दानं प्रतिग्रहो वापि यजनं पितृतर्पणं। काम्य
होमहोमस्तथादौ स्नानवर्ज्जं तु वर्ज्जनं। श्रावण्यादानकर्म्माणि वैश्वदेवी तथैव च।
आशौचे विनिवर्त्तेरन् कर्त्तव्यास्तदनन्तरं। पैठीनसिः नानुश्रौतस्मार्त्त क्रिया
णां मन्यवर्त्तमुक्तं। बृहस्पतिनापि। सूतके मृतके चैव अशक्तौ श्राद्धभो
१६९ जने। प्रवासादिनिमित्तेषु हावयेन्न तु हापयेत्। अन्येन होमं कारयेन्न तु कर्म १६९
हानिं कुर्यादित्यर्थः। सर्वं संकल्पितं द्रव्यं दानेनाशौचं। अथ सूतकाद्यतिक्रां
तौपासनविधिः॥ प्राणानायम्य तिथ्यादि वं स्मृत्वा मम द्वादशादिनोन्यतिक्रान्ता
नां सायंप्रातरौपासनहोमानां अभावप्रत्यवायपरिहारार्थं अग्निहोमं ऽयक्षिता

ज्याहुति होमं करिष्ये। तथातिक्रांत होमं च करिष्ये ग्निं परिषिच्य। विश्वानि न इति

द्वाभ्यां मलं हृत्वा लयोपस्थानं हुत्वाग्ने र्वैवदाज्यं संस्कृत्य स्रुवसंमार्जनं हुत्वा

केनचित्पर्णेन स्रुवमध्ये चतुर्वारमाज्यं निक्षिप्य। मनो ज्योतिरित्यस्य वामदेवोग्नि

स्त्रिष्टुप्। मम द्वादशादिनमध्ये प्रथमदिनसंबंधि अतिक्रांतस्य सायमोपास

नस्य प्रत्यवाय परिहारार्थं प्रायश्चित्ताज्याहुतिहोमे विनियोगः। इत्याज्या

हुति हुत्वातिक्रांत होमं च कुर्यात्। एवं यावद्दिनसंबंध्यतिक्रांतिः स्यात्तावद्दिन

मेव कुर्यात्॥ अत्रश्लोक स्मृतं॥ प्रोषित्वा यो दशरात्रं स्वबुद्धं गृहीत माज्यं जुहुयात्॥

मनो ज्योतिर्जुषतामाज्यं। विछिन्नं यज्ञं समिमं दधातु। या इष्टा उषसो

या निम्रुचा स्तास्संतनो हविषा घृतेन। स्वाहेत्यग्निहोमवदतिहोममेकरति। स्था

लीपाकातिक्रमे त्वतिक्रांतदर्शस्थालीपाकं प्रथितद्धोम पूर्वकं करिष्ये तत्राघाया

नं करिष्ये ॥ ॥ इतिप्रयोगः ॥ ॥ अथानध्यायापवादः ॥ ॥ स्मृतिरत्नावल्यां ॥
अल्पाञ्जपेत्त्वनध्याये पर्वण्यल्पतरं जपेत् । नित्यजपे च नागे च क्रतोपारायणे
पि॰ पि वा नानध्यायोस्ति वेदानां ग्रहणे ग्राहणे स्मृतः । देवतार्च्चनमन्त्राणां
नानध्यायः स्मृतस्तदा । नानध्याये ऽजपे हृदानू रुद्रांश्चैव विशेषतः । पौरुषं
पावमानं च गृहीतनियमाहृते ॥ ॥ स्मृत्यर्थसारे ॥ यत्तु दैवपक्षमीपर्वप्रति
पद्वर्जितेषु नुवादांग न्यायमीमांसा धर्मशास्त्राणि चाभ्यसेत् । अध
१७० मीचोनेः । स्तोत्राणां रौद्रमंत्राणां पैतृकाणां च नैत्यके । जपे होमादिकार्ये १७०
षु नानध्यायो न काम्यके । कर्मप्रदीपे ॥ नैत्यके नास्त्यनध्यायः संध्योपास
न एव वा । उपाकरणिकर्मान्ते होममंत्रेषु चैव हि । एकोमव्वमथ्ये वं वा.य.ज.

सामथर्वातुरः। अप्रकाश्य पठीयीत मारुते वापि वा यदि। नानध्यायस्मृतां
गेषु नेतिहासपुराणयोः। न धर्मशास्त्रेष्वन्येषु पर्वण्येतानि वर्जयेत्। एष ध
र्मः समासेन कीर्तितो ब्रह्मचारिणां। ब्रह्मणाभिहिता पूर्वमृषीणां भावितात्म
नां। अधीयीत सदा नित्यं ब्रह्मविद्यां समाहितः। सावित्रीं च तथा रुद्रीं वेदा
तांश्च विशेषतः। अभ्यसन्स सदा युक्तो सम्यक् स्नानपरायण इति। इत्यनध्या
यापवादः॥ ॥अथातुरस्नानविधिः॥ ॥स्मृत्यर्थसारे॥ रजस्वलां ज्वरितां
चतुर्थेऽहनि सवपादानं दत्वा पुण्याहेन विशोधयेत्। अघोरे। संग्रहे। आतुरावे
ष्टे उम ऋतुमतीवस्थास्नानं कथं भवेत्। स्पृष्ट्वा तु तां परिस्नाय्या दश वारं चानातु
रा। वासांसि दद्याद्भिक्षैव परिधाप्य यथाक्रमं। ब्राह्मणान् भोजयित्वाथ पुण्या
हेन विशुध्यति। आतुराणां तु सर्वेषामेवं शुद्धिर्विधीयते॥ स्मृत्यन्तरे॥ आ

समिन्नाशे साभिद्धं गे सीमातिक्रमणेनद्दी ॥ द्रव्यारोहणं पत्नी पुनः संधं वियोयते ॥१॥
अवाक्यी द्वादशाहं तथा पुनराधानमिष्यते सद्यो दिङ्कुर्यादाऽथ मर्यास्थेत्यादि सप्तक ॥२॥
तुरस्नानउत्पन्ने दशाहसयोहनातुरः । स्नात्वा स्नातस्पृष्टवादेवं ततः शुध्ये
त्स आतुर इति ॥ ॥ अथाग्निविच्छित्तिनिमित्तानि । भ्रष्टश्च इपतितोदक्या
काकवानररासभैः । स्पृष्टाग्निश्चतुरीषेपाविनश्यत्यरणीध्रुवं । अग्निमि
तिविशेषः । उदक्यारजस्वला । अर्वाग्द्वादशाराशात्तु वा डालापतितादिभिः ।
१७१ स्पृष्टो नष्टोऽग्निरारूढः स्वरण्यात्मसमित्सुसः । सीमातिक्रमणेन घाउत्ता
रेणाग्निनाविना । द्वादशाहं होमलोपे स्त्री पावकं च यस्य च । पिंड यद्ग
७१ त्पयेवे ववे श्व देवद्वयस्य च ॥ अग्निविच्छित्तत्वे इति विशेषः । विवाहाग्निस १७
जो र्य्यथ्ये सीमामुल्लंघ्य गच्छति । होमकाले यपेतस्य पुनराधानमिष्यते ।
अग्नावनुगते यत्रे होमकालद्वयं व्रजेत् । उभयोर्विप्रवासे वा लौकिकाग्नि
र्विधीयते । जोषितेतु यदा पत्नी उभौ ग्रामान्तरं व्रजेत् । होमकालो यदि श्रांता

न स्याद्दोषेण युज्यते। यजमानश्च पत्नी च उभौ प्रवसतो यदि। आहोमान्नि-
निवर्त्तेत पुनराधानमर्हतः। कूर्मपुराणे॥ निक्षिप्याग्निं स्वदारेषु परिक-
ल्प्यर्त्विजं तथा। प्रवसेत्कार्यवशतो भ्रोवृथैव न चिरं वसेदिति। कार्य
वानिति धर्मेणार्थी। तथा च सत्यव्रतः॥ धनार्जनचिकीर्षुर्वा ऋतुः जवा सोमपाग्नि-
होत्रिणः। धने यत्नः संभवेदी स्थानीर्थाद्यर्थं न तु प्रजेदिति। स्वदारोपपत्व भार्या री
समारुह्याथवा स्वमात्मनि। योजने योजने हव्यं मग्निर्थ्ये न विनश्यति। दती
यप्रहतीनां तु पर्वणाम निपातने। पुनराधानमिच्छन्ति वेदविद्धर्मवित्तो द्वि-
जाः। केचिदिति वचनादपरे पर्वद्वयातिक्रमे पुनराधानमिच्छन्ति। अत एव
स्मर्यते। होमद्वयात्यये दर्शपूर्णमासात्ययेऽथ तथा। पुनरेवाग्निमादध्या-
दिति भार्गवशासनं। होमद्वयात्यय इति अग्नावनुगते होमद्वयात्यय इति

द्रष्टव्यं ॥ अथाग्निविच्छित्तिप्रायश्चित्तं ॥ चैमासिकं गोवधोक्तं सत्ताग्नेर्निः
सृतिर्भवेत् । चान्द्रायणं वा हि मासस्य दानं वापि समाचरेत् ॥ संवत्सरं तु त्यक्ता
ग्निं कुर्याच्चान्द्रायणव्रतं । अथवाप्युपवासः स्यात्प्रति मासं दिनं भवेत् ॥ अ
हो ऽजाप त्वा श्वाद्धेयो ऽग्निं त्यजति नास्तिक्यात् प्राजापत्यं समाचरेत् ।
अन्यत्र पुनराधानं दानमेव तथैव चेति । कारिकायां । स्मृत्यन्तरे । मा
से मासे कृच्छ्रस्यात् षण्मासाद्द्विगुणं भवेत् । त्रिगुणं नवमासात्तु वत्सरा
त्पतितो भवेत् ॥ स्मृत्यर्थसारे ॥ नास्तिक्यादग्नित्यागे मासद्वये कार्यः । १७२
१७२ मासचतुष्टये ऽतिकृच्छ्रः । षण्मासे पराकः । षण्मासोर्ध्वं चान्द्रादिव्रतं । सं
वत्सरादूर्ध्वं त्रैमासिकं षाण्मासिकं वा । आलस्यादिनाग्नित्यागे तु
द्वादशाहोनिक्रमणे त्र्यहमुपवासो मासातिक्रमे द्वादशाहं त्र्यहमुपवासः

पयोभक्षणं वा। प्रमादादग्नित्यागे त्रिरात्रं वा द्वादश वा लघु प्राणायामाः। अ
पराग्न्याद्यनुर्विंशति। रात्रौ द्वादशरात्रं त्यक्त्वा द्वाविंशतिरात्रं तावत्सं
ख्याणायामः। आग्निहोत्रात्र्युपवासः। आपरिगते त्रिरात्रं। आसव
त्सरात्कामतः परं प्रायश्चित्तं कार्यं। सर्वत्र यावत्कालं होमीनावद्द्रव्यं द
द्यादित्याहुः। संवत्सरादूर्ध्वमग्निहोत्रवर्षत्यागे चान्द्रायणं पुनराधानं।
द्विवर्षत्यागे चान्द्रस्य -- मापनं च चान्द्रद्रव्यं वा। त्रिवर्षत्यागे कृच्छ्राष्टं
गोदानं चान्द्रपुनराधानं। नित्यहोमे च तिरोहिते संस्थितो याज्ञं वप्रपूर्ववन्त्वा य
जुः हुत्वा गृहीत्वा ज्ञं मनो न्युत्थानं जुहोतीव। औपासने नुगच्छे चोऽपलेपा
दिपूर्ववन्त्। आहूत्यग्नौ त्रियां गारप्रतिष्ठाप्य हविर्भुंजे। अनन्यस्माद्

मवाल्लाव्ययी नाग्नी या यदि वाग्न्यही। पर्य्यहनादिवान्नौ तौ संस्यात्माऽपंच
पूर्ववत्। अथाश्वेत्तनया ऽऽत्वा यथापूर्वं ऽजुहोत्यथ। अन्याधाने ह्रते
योगात्मा क्षेदन्तु गतिर्भवेत्। प्रायश्चित्तमिदं हुत्वा पुनरन्वादधात्य
172 थ। व्याहृत्या त्वा श्वे वह्नरूपस्थेय इति बौधायननाशायः। समारूढे
स्मिन्नाग्नौ पुनराधायमिष्यते। उभयातिक्रमे कार्य एकः पथि ह्नतश्च
रुः। वह्णमिपुनराधेयं अयंतः स्वाहिमनोमतं। अन्याधायकसंभा
१७२ रान्यथासंभवमाहरेत्। उपलेपादिकं हीत्वा संभारानिदधातिता
न्। संभारेष्वादधात्यग्निं यो त्रियादि गृहाहुतं। स्त्रावेणऽजुयादा १७
त्पमयाश्वेत्तनयेकया। अथाश्वेत्तस्य विमदो ग्निः पातिः। स्वालि

…के सर्वतिथ्यां तेयद्यन्याग्नौ मथनं जयेत्॥ स्वाग्नावन्ये यजे यज्ञ कार्यः पार्थिवः
तः श्वसः। आहिताग्नयः पणे श्रीयान्नवान्न यत्र वैश्वानरः। वैश्वानराय कर्त्तव्यं श्च
रुः पूर्णाहुतिस्तथा॥ आज्यं द्वादशाह वत्स गृही वापूरये तत्र चं। अनया
त्वाहुतिः कार्या सा पूर्णाहुतिरिष्यते। ग्राम्याग्निना तु संसर्गे सवर्णाय यव स
र्जयेत्। वैद्युतेन तु संसर्गे कुर्यादग्निमते चरुं॥ अथ पुनः संधानं॥ पुष्योत्त
रासु विशाखासु ज्येष्ठां साग्निकृतयेऽरभेत्। अग्न्याधानमरिकास्तु कार्यं
विद्वद्भिर्जन्हि॥ अथ स्मृते॥ अग्न्याधानं कृत्तिकास्तु रोहिण्यां मृगशिरसि
फाल्गुनीषु विशाखयोरुत्तरयोः प्रोष्ठपदयोरेतेषां कस्मिंश्चिदिति।
अथ पत्नी दक्षिणत उपवेश्योपलेपाद्यग्निं हुत्वा। अग्निसमीपे ज्ञात्वा यत्कि
ञ्चिद्द्रव्यं होमद्रव्यं च दद्यान्नीतत्र संकल्पः॥ आवसथ्यादिकं संकीर्त्य॥

अग्निविच्छेददिनादारभ्य एतद्दिनपर्यंतं सायंप्रातरौपासनहोमलोपजनि
तप्रत्यवायपरिहारार्थं तथा दर्शपौर्णमासस्थालीपाकहोमलोपजनि
तप्रत्यवायपरिहारार्थं च तथा दर्शपौर्णमासस्थालीपाकलोपजनितप्रत्य
वायपरिहारार्थं केन चित्स्मृत्युक्तमार्गेण प्रायश्चित्तं करिष्ये॥ तथा सा
यंप्रातरौपासनहोमद्रव्यं दर्शपौर्णमासस्थालीपाकद्रव्यं च यस्मै कस्मै
चिद्ब्राह्मणाय संप्रददे॥ पुनस्तिथ्यादिकं संकीर्त्य॥ विच्छिन्नस्यौपास
१७४ नाग्नेः पुनः संधानं करिष्ये॥ तदर्थं विवाहहोमं गृहप्रवेशनीयहोमं चैकतं १७४
त्रेण करिष्ये॥ विवाहवदाघारांतं कृत्वाग्न आयूंषि तिपं ः याहुती
र्हुत्वा यो मे स्विष्टत्वार्यमणमित्यादिभिर्लाजाहोमं च हुत्वोपविश्य पानः
प्रजापतिमिति च तन्त्रेणः राज्यं हुत्वा समंजंत्विति हृदयांजनं कुर्यात्।

कारिकापि॥ उपलेपादिकं कुर्यादाघारांतं विवाहवत्॥ विवाहाज्याहुती
हुत्वा लाजाहोमो न वेदिह। गृहप्रवेशनीयाख्या हुत्वास्याहृदयांजन। परि
णीत्यादिना स्यात्र लाजानां वपति स्वयमिति। लाजानां स्विष्टहंत्रा स्वीत्य
क्तं पुरस्तात्॥ स्विष्टकृदादि समापयेत्॥ ॥अथवैश्वदेवविधिः॥ ॥
स्मृतिसारे॥ गृहस्थो वैश्वदेवाख्यं कर्मप्रारभते दिवा। अन्नस्यचात्म
नश्चैव संस्कारार्थं मिहेष्यते। उभयसंस्कारार्थं मिति जयंतप्युक्तं॥
याज्ञवल्क्यः॥ नात्मसंस्कारार्थमेवेदं कर्मणेप्युक्तं॥ कंडनी पेषणी चुल्ली
सोदकुंभी च मार्जनी॥ पंचसूना गृहस्थस्य तेन स्वर्गं न विंदति। औ
पासने तु होतव्यं शालाग्नौ वा विजानता॥ विकल्पस्त्वेच्छया कार्यो नास्त्र

१७५॥ वावत्स्वस्थितिः॥ ॥आचमप्रति थ्यादिकं संकीर्त्य। उपात्तदुरितक्षया
र्थं श्रीपरमेश्वरप्रीत्यर्थं अन्नशुध्यर्थं पिवसनविघ्नसर्थं वैश्वदेवा
ख्यं कर्म करिष्ये। परिसमुह्य पर्युक्ष्य। विश्वानिन इति पुष्पाचरणं स
त्यहविश्चमन्त्रमगनावधिक्षित्य प्राक्षो घास्पाद्घतात्पक्कं सव्याद
क्षिणजान्वाच्य हरिस व्यं निधाय दक्षिणहस्तेन जुहुयात्॥ ...
परिशिष्टे॥ उत्तानेन तु हस्तेन अंगुष्ठाग्रेण पीडितं। संहतां गुलिपा १७५
णिस्तु वाक्यतो जुहुयाद्धविः। कारिका॥ ओष्ठो घास्पघृतात्पक्वं
हृदि सव्यं विधायचेदिति। ... नपः। जुहुयात्सर्विषाक्तं तु तैल
क्षारविवर्ज्जितं। दध्याक्तं पयसाक्तं वा तदभावे पुनः पिवेति॥ पाणि

नावकाठिनं हविरिस्कन्नं प्रागेव। प्रजापतिर्यदस्योक्तिर्वैश्वदेवेननुस्मर
तिमितिप्रतीचो क्तं। एवं सूर्यायस्वाहेत्यादिभिर्मन्त्रैर्दत्त्वाहुतिं जुहुया
त्॥ अयं नः॥ व्याहृतिभिश्च होतव्यमेव चारात्नुविच्छितं। अयमभिप्राय
एतास्वपक्षैव देवतास्वि इति सूत्र स्थेन एव कारेण बलिहरणे एतास्व
एव सूर्यादिदेवताभ्यो दत्तास्वो होतव्यमितिप्रतीयते। तेन वैश्वदेवा
न्यास्योपि देवताभ्यो जुहुयादित्येव नाहं प्रयुञ्जानः सूत्रकृन्ज्ञाप
यति। तास्तु व्याहृतयस्तु सर्वसाधारणत्वात्। अतो व्यस्तसमस्त
व्याहृतिभिश्च जुहुयात्पर्यूहणे दक्षिणे कुर्यात्। यस्यापि विलिप्संसदद्या
ति यत्र ब्राह्मणेषु क्लप्तान्॥ कालस्त्री॥ अविनक्तेषु संस्पृष्टेष्वेव
हे

नापि हुतं तु यत् । देवयज्ञाय सर्वार्थं लौकिकाग्नौ हुतं यदि । एक
स्मिन्नेव काले तु पश्यते न पुनः पुनः । एकस्मादेव पाकात्तु वैश्वदेवं
समाचरेत् । अन्नस्य चालनस्यैव स्नानादोषाय तत्तये । गृहस्थस्या
य४ नानायं हि श्वदेवं नरो विवृहि । अनश्नतोपि कर्तव्यमन्यथा पापभाग्भ
वेत् ॥ ॥ कारिका ॥ पञ्चहोत्रोदगणे कुर्याद्देवयज्ञो यमं । दितिइति ।
 ततस्त्र्यायुषमिति । ओं नमः इत्युपस्थानं । वसिष्ठः ॥ अनग्निस्त्वेक २७६॥
स्थो यो विप्रः सोन्नव्याहृतिभिः स्वयं । हुत्वान्नाकल मंत्रैश्च शिष्टा
हुतवलिं हरेत् । अनग्निकश्रोतस्मार्ताग्निरहितः ॥ इति देवयज्ञः ॥
अथ भूतयज्ञः ॥ तं देवयज्ञान्नशेषेण कुर्यात् ॥ कारिका ॥ एतेषु

विबलिं हत्वाग्ना वु संस्कान्निरंतरान् । एते दिक्षि तिसृर्याय स्वाहे त्यादि
भिः ईशानादिभिर्निरतर्वा प्राक्संस्थांपंक्तिं हत्वांतरालं त्य स्वाहेत्यादिभिः
पंचभिः प्राक्संस्थाने बलीन्हरेत् । इहापि भवतिस्वाहाकारेणवित
यज्ञावे । अत्रोच्यत इताबलेः प्रत्यग्निप्रायेति बलिंहरेत् । उदग्नेप्रा
क्कोनेरिं इ पुरूषेभ्यो बलिंहरेत् । यमायेत्यंतरालस्य हरेद्दक्षिणतो
बलिं । याम्याउदक्पथं यमपुरूषेभ्यो बलिंहरेत् । प्राच्यां ब्रह्मवं
लिं । याम्यादुदक्पथं यमपुरूषेभ्यो बलिंहरेत् । प्राच्यां ब्रह्म
ले ईशावरूणायेतिमंत्रतः ॥ अस्याउदक् वरूणपुरूषेभ्यो बलिंह
रेत् । सोमायेत्यंतरालस्य हरेदुत्तरतो बलिं । सोम्याक्कले रुद्र
पुसोमपुरूषेभ्यो बलिंहरेत् । अंतरालमध्ये ब्रह्मणे ब्रह्मपुरूषेभ्यः ।

विश्वेभ्यो देवेभ्यः। सर्वेभ्यो भूतेभ्यः। दिवाचारिभ्यः। पश्चाद्द्वीकालं करोति नदा
रात्रौ नक्तंचारिभ्य इति। स्वधायै इति पदस्थाने नमस्कारपदं नमः पदमिति। पदे
कलालं करोति न दारात्रौ वापि स्वधायै स्वाहेति जुहुयात्॥ दिवाचारिभ्य इति॥
सूत्रे दिवाग्रहणाद्वैश्वदेवस्य द्विवारं करणं स्यात्। इतरथा सायंप्रातरु
पदेशात्सायंप्रातरुपक्रम स्यादग्निहोत्रवत्॥ तथा निष्टं अतो दिवाग्रहणं
स्यादिति सारे। प्राचीनावीती शेषमन्नं स्योदकं दक्षिणापित्रेभ्य इति दक्षिणस्या
न्निनयेत्॥ इति पितृयज्ञः॥ एते देवयज्ञस्य तन्त्र पितृयज्ञा वैश्वदेवशब्दे
177 १२७ नोच्यते॥ हुतशेषं तु नादद्याद्यज्ञ[illegible]ः कर्यं च न॥ अहुत्वा तु ज्ञानतो वि
प्रो हुतं तस्य वृथा भवेत्॥ वैश्वदेवाकृती कृत्वा बलिकर्म यथाविधि। कुर्या १२७
द्धोमयसौ [illegible] न मोद्धरेत्स्वयमेव न तु॥ [illegible] तु हृते [illegible] प्राणायाम

त्तानं चरेत्॥ नोद्धरेद्धुतं कूर्मकं तु स्वयमुद्धरणेन च॥ इदं बलिकर्म अग्नेरुत्तर
तरतो ग्निसमीपे कुर्यात्॥ अथ स्मृतिचंद्रिकायां॥ प्रत्यहं रोगविनाशार्थी न
राकारं बलिं हरेत्॥ आयुरारोग्यसौभाग्यपुत्रविद्याप्रहं हनि। काम श्रीध
र्ममोक्षार्थी च काकारं बलिं हरेत्॥ च काकारं नराकारं कुर्यादग्नि समीपतः।
पंचस्वेतेषु विप्राणां मुख्यः काकाकृतिर्भवेत्॥ यः काकारेण यो विप्रः सदान्न
तं बलिं हरेत्॥ सर्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात्॥ अस्मत्कारवे
यां नराकार एव मुख्यः। कारिकायां तु तोयात्॥ एवं पंच बलि मध्ये व्यवस्था।
अथ नकारकृतिः। प्रागादीशानपर्यंतं मंडलं च मे महीतले। चदरीफल
मात्रान्नं घृतक्षीरादिमिश्रितं। स्म्यादिवास्तुपर्यंतं नैरंतर्येण तान्हरेत्।
पूर्वपश्चिमभागे तु प्राकृ संस्थं प्रपोरुषं। तद्दक्षिणे तु विश्वेभ्यः सर्वे

५ इति पश्चिमे। तदुत्तरे दिवे त्यादि नत्वामि त्यादिना भिक्षि। ईशान्यां तु
वहिःस्थकाश्यपो स्थाथ बलिं हरेत्। तथा तन्नीयमाग्नेय्यां निनयेत्तु
वि। अपसव्यं स्वधा। त्यादिमं त्रेणपितृतीर्थतः। पितृयज्ञान्ते शेषेण तथा
नैरृत्यकोणके। वायव्यकोणे तु तथा ~~अभावे बालि नाग्नावस्म~~ निवितं कंठे
178 ~~निवीती। अथ यथाशक्तं। कुरुपे द्वे कोन पादो~~ ऋक्षात्याच म्यास न्वा घा प था
~~रा~~न्परिकल्प्य नामगोत्रेषु ह्या पितरः प्रीयतामित्यक्षतोदकं क्षिपेत्। स्कंदे।
१७८ नित्यश्राद्धं देवहीनं नियमादिविवर्जितं। दक्षिणारहितं त्वेतद्दातृभोक्तृ १७८
व्रतोज्झितं। याज्ञवल्क्यः। आवाहनं स्वधाकारं पिंडाग्नौकरणादिकं।
ब्रह्मचर्यादिनियमान्विश्वेदेवांस्तथैव च। नित्यश्राद्धे परित्यजेद्दाता सेतु

शुनो बलिमथाहरेत् । तत्र मंत्रः । स्वाहाकारश्चोपवीतिपितृतीर्थेन नत्वयेत् ।
द्वौ श्यामशबलौ चेतौ शुनौ देवग्रणोहितौ । देवत्वं वा पितृत्वं वा याम्यां दक्ष
कृलिं सुधीः । द्विधा विभज्य सिद्धान्नं समीपे स्थनि धापयेत् । पर्यग्निकरणं कु
र्यात्सिद्धान्नस्याप्ययं विधिरिति यदुक्तं तद् समच्छाखायामनुक्तमेवाकु
र्यंश्चेद्बहुशाखात्वान्नद्रोपदृष्टं । शाखान्तरे ज्ञातव्यं । याज्ञवल्क्योपि । देवे
भ्यश्च हुतादन्नाच्छेषाद्भूतबलिं हरेत् । अन्नं भूमौ श्वचाण्डालवायसेभ्यो
बलिं हरेत् । स्वगृह्योक्तविधिना वैश्वदेवहोमं हुत्वा तद्देवादिभ्योन्नेनाद
त्तेभ्यो बलिं अन्नग्रहणमपकृष्य दासार्थं । तदनन्तरं यथाशक्ति भूमाव
न्नं श्वचाण्डालवायसेभ्यो बलिं हरेत् । वराहाद्यास्मि पापरोनिपतितेभ्यः ।। क्व ।।

यथाह मनुः। शुना च पतितानां च श्वपचां पापरोगिणां। वायसानां कृ
मीणां च शनकैर्निक्षिपेद्भुवि॥ ॥अथ पक्वाभावे निर्णयः॥ स्मृतिसारे॥
पक्वान्नाभावे यवाः सेवनं तण्डुलानां षष्ठी स्कचा। पयो दधि घृतं वापि कन्दमूल
179 फलानि च। योजयेद्वैश्वदेवादौ नले वाप्सु वा जले। संभवे सति पक्वं ह
विष्यपक्वान्नं संस्पृष्टं हविष्यमपि सर्वथा वर्ज्यं। अहविष्यस्यापि वैश्व
१७९ देवस्यान्न। अथात्र स्मर्यते। यदन्नः पुरुषो लोके तदन्नास्तस्य देव १७९
ता इति। अकृते वैश्वदेवे तु भिक्षुके गृहमागते। उद्धृत्य वैश्वदेवार्थं भि
क्षां दत्वा विसर्जयेत्॥ अत्रिः। ब्रह्मचारी यतिश्चैव विद्यार्थी गुरुपो
षकः। अध्वगः क्षीणवृत्तिश्च षडेते भिक्षुकाः स्मृताः॥ इति भिक्षुनयः॥

अथ पितृयज्ञः। प्राचीनावीती स्वधापितृभ्य इति मंत्रेण पराचीनेन पाणिना।
न्नोपान्नं दक्षिणस्यां दिशि दद्यात्। कारिका। अयं तु पितृयज्ञस्यान्नालाभे
नत्र यं भवेत्। स्कंदे। निर्लेपनोदकं त्वंय ईशान्या यक्ष्मणो पर्ये तु। अदद्यावा
यस्मा बलिं नित्य श्राद्धं समाचरेदिति॥ ॥इति वैश्वदेवाख्यं कर्म॥ ॥
कारिका। कुर्वीत स्नातकश्चेदं पृथक्पाकी भवेद्यदि। स्मृतिसारे। स्नात
को ब्रह्मचारी वा पृथक्पाकी वैश्वदेवाख्यं कुर्यात्। अतो विवाहाग्नेः प्रा
गिव धानात् न गृह्याग्निनियमः। गृहस्थो वैश्वदेवाख्यं कर्म सार्वभत्रे तेदिवे
स्पत्र गृहस्थे प्रमूपलक्षणं॥ ॥अथ मनुष्ययज्ञः॥ निवीती भूत्वा सन
कादिमनुष्येभ्यो हंतः स्कुज्ञार्य संकल्प्य बिआया न्नं दद्यात्। अभावेषो

लक्षाग्रासान्निर्वितं कंठलंबितं॥ अथ श्राद्धं॥ बह्वृचपुरुषोद्देशेन पादौ प्र
क्षाल्याचम्यासनाद्युपचारान्दत्त्वा कल्प्य नामगोत्रे उच्चार्य पितरः प्रीयन्ता
मित्यक्षतोदकं क्षिपेत्॥ स्कांदे॥ नित्यश्राद्धं देवहीनं नियमादिविवर्जितं।
180 दक्षिणारहितं चैव दातृभोक्तृव्रतोज्झितं॥ याज्ञवल्क्यः॥ आवाहनं
स्वधाकारं पिंडाग्नौकरणादिकं। ब्रह्मचर्यादिनियमान्विश्वेदेवांस्तथै
१८० व च। नित्यश्राद्धे त्यजेद्दाता भोज्यमन्नं प्रकल्पयेत्॥ भोक्त्रभावे किंचिद १८०
न्नं समुद्धृत्य विप्रेभ्यो यथाशक्ति गोभ्यो निवेदयेत्॥ उद्धृतान्नं संकल्प्य स्वधा
कारक्रिया ता। नित्यश्राद्धमदैवं स्यादर्घ्यपिंडादिवर्जितं। नावाहनं नहो
मं च नो क्षान्नं न विसर्जनं। श्राद्धादिनियमो नास्ति किंचिद्दत्त्वा विसर्ज

चेत्। एकमप्यान्नाये द्विप्रं पित्रर्थं पंच यज्ञिकं। न चैवात्र प्राशयेत् किंचित् वैश्वदेवं न चाचरेत्। पित्रर्थं वा पंचयज्ञिकं। न ब्राह्मणं भोजयेत्। न प्रत्यर्थपूजनम्

ऐ। ये पिंडपात्र मिवर्जितं। अर्घादहरहः श्राद्धं मन्नाद्येनोदकेन वा॥ स्कंदे॥ अतिथिं सायमायातमपि वा गृहतृणोदके। सम्भाव्य पश्चिक त्यै प्तुनिःत्रा साल्प्र हरस्तु धीः। यो तिथिं न जये इच्छाग्नजितः सर्वदेवताः॥ अथ गोग्रासः॥ सौरभेयि जगन्मा देवानाममृतप्रदे। ग्रासं गृहाण मे दत्तं सर्वकामप्रदा भवेन्। सर्वेन मिवेदयेन्। स्वाहाकारवषट्कार नमस्कारादिवोकसां। हन्तकारो मनुष्याणां पितॄणां च स्वधा न्तथा। द्वारे पितामहाय नमः। प्रतीच्ये उमापतये नमः। आग्नेय्यां बलभद्राय नमः। दक्षिणे यमवि ष्णुभ्यां नमः। नैऋत्यां स्कंदवरुणाभ्यां नमः। पश्चिमे सोमसूर्याभ्यां नमः। वायव्यामश्विभ्यां नमः। वसुभ्यां नमः। उत्तरस्यां सोमाय नमः।

रुद्राय नमः। ततो गृहां गणे बलिं सर्वे इंद्राय नमः। गृहेभ्यो नमः।
गृहमध्ये ब्रह्मणे नमः। ततो बलि त्रयं गृहां गणे येभ्यता इत्यादि भि
स्त्रिभिर्मंत्रैर्दद्यात्। गोदोहनमात्रं स्थित्वातिथिमाकांक्षेत्। तस्तो।
पादौ प्रक्षाल्य पात्रमध्यगृहं प्रवेशयेत्। ओं ताम्यृथिवी तिमंत्रं जपेत्।
इति वैश्वदेवविधिः॥ अथ माध्याह्निकस्नानविधिः॥ ग्रामादति
१८९ दिताया दिशि स्थितं नद्यादिकं गत्वा हस्तौ पादौ प्रक्षाल्याचम्यातिथ्या दि
दिकं संकीर्त्य मम दुष्टच्छिद्रसर्वाद्दिन्यादि जन्मपापापनुत्त्यर्थं दे
वऋषिपितृतर्पणार्थं माध्याह्निकस्नानमहं करिष्ये। इमं मे गंगे तं
आपो हि ष्ठेति त्वेनमार्जनं कृत्वा इमं मंत्रेण जलावगाहनं कुर्यात्॥ इ

मंमद्रत्यस्यसिंधुद्विश्चेयमेधानघोजगती।उल्लावगान्हने।स्थितादि
तेइतिचेत्यादिपूर्ववत्।पुनस्त्रिमज्जनंहात्वाचम्यपथाद्धोत्मासाविद्धी
जाह्मातर्द्विस्नोरितिमंत्रंजपेत्।नद्धिह्नोरित्यस्यमेधातिथिर्विष्णुर्गाय
त्री।दुःस्वप्नहननेजनादिजन्यपापक्षयार्थंजपेविनियोगः।एवंज
पा।व्याहृत्यादितर्पणंपूर्ववत्कुर्यात्॥ ॥अथब्रह्मयज्ञः॥संग्रहे॥नच
स्मरेदृषिंछंदःश्राद्धेवैतानिकेमखे।ब्रह्मयज्ञेचवैतद्वत्ओंकारंतु
नोच्चरेत्।हेमाद्रिवसिष्ठः।सर्वत्रोंकारमुच्चार्यआद्यमंत्रेष्ठनोच्चरेत्।आर्षं
छंदांसिवैतद्वद्ब्रह्मतर्पणकर्मणीति।ब्रह्मयज्ञसंध्यायाःपूर्वपश्चाद्वे
तिविषयेप्रतियज्ञोनिर्णयःक्रियते।स्मृत्यर्थसारे।सविलमभिमत्यार्थहुतसंध्या

द्विकक्रियाः। संतर्प्य दिव्यपितॄन्ऋषीन्गंधतिलोदकैरिति। स्मृत्यर्थसारे।
प्राणायामत्रयं कृत्वा गायत्रीं सर्ववज्जपेत्। पुनः सूर्यं नत्वा ब्रह्मयज्ञा
दिकान्कुर्यादिति माध्याह्निके उक्तं। तथा चरामार्चनचंद्रिकायां।
स्वगृह्योक्तमंत्रवरैः स्नात्वा संध्याविधाय च। ध्रुतकर्मरतस्सद्देवा
182
दीन्संतर्पयेत्सुहृत्। ऋग्वेदे। आगत्यां दर्भानास्तीर्य प्राङ्मुख उपविशे
त्। शुचिदेशे वनं तीरनियमनिवसथं प्राङ्मुख वचनं नियमे नात्र प्राङ्मु
१८२ खतास्यात्। अथप्रयोगः॥ धौतशुक्लांबरधरः आचम्य तिथ्यादिकं सं १८२
कीर्त्य। मम उपात्तदुरितक्षयार्थं श्रीपरमेश्वरप्रीत्यर्थं स्मृत्युक्तदेवता
प्रीत्यर्थं देवर्षिपितृतर्पणार्थं च ब्रह्मयज्ञाख्यं कर्म करिष्ये॥ आचम्य।

तत्र विशेषः। मुखं छिद्रं गुह्यमूले नाभि मूर्ध्नि सकृदुपस्पृश्य नेत्रास्य दृक्घ्राणौ ना
सिके श्रोत्रे हृदयमिति छिद्रस्पर्शनक्रमः। अथोपस्थं कुर्यात्। उपस्थं आस
नविशेषं। तद्यथा। वामचरणं गुल्फोपरि ऊर्ध्वं दक्षिणं गुल्फमारोपयेत्। इति।
स्तैत्तिरीयशाखायामुक्तः। ततः सव्यकरे उत्ताने प्रागग्रमुल्लो द्वे पवित्रे स्था
पयित्वा। द्विदलैः कुशपवित्रं। तेन सव्येन नीचं आगुलिं दलं दक्षिणकरं
संदध्यात्। द्यावापृथिव्योः संधिर्व्योः संधिमीक्षेत। तानो ध्यन्ति धीगन्धस्वाहा।
संविल्यवाक्षिणी। आत्मानं समाहितमनस्कं मन्येत। ततः ॐ पूर्वव्याहृतीस्ति
स्रः। सहाडुकारान्तिव्याहृतिप्रतिप्रणवे त्राकारनकार्यां। ततः षट्कः। अर्द्धवैराः।
सकाष्ठः। ततः सर्वां मनसानीयां। एवं त्रिवारं पठित्वा पूर्वाभिसंधितं आपस्त

मि स्वर्थः। स्नात्वाघधीयीत। नमो ब्रह्मण इत्येतां त्रिरुक्त्वा प्रणवं वदेत्॥ यदा
गृहे ब्रह्मयज्ञं करोति। तदा मनसा जपः स्यात्। स्नानथाने स्नैरथ्यतिः। ग्रामसमन्
न्वास्वाध्यायमधीयीत। द्विवानक्तं वेति। अथ तर्पणं॥ स्मृत्यर्थसारे। व
सुरुद्रादित्यरूपास्तु श्राद्धे तर्पयेत् पितॄन्। नामगोत्रे समुच्चार्य तिले
स्तीर्थेषु संयतः। अथवा श्राद्धवाह्नो गोष्पाद्यत्या तर्पणे पिवर्जित इति।
वस्वादीनां समाहितानामेव पित्रादीनां तर्पणमस्तु। यत्नश्चिच्छाचार ए
८३ व स्यायच्छोद्रूपते। एकोद्दिष्टे तथैव वर्षे मान्तुषेऽह्नौ क्षयौ स्मृतौ। पितॄणां १८३
तर्पणे मूया मन्त्र यएव तूष्णीं स्मृदेति॥ अथ तर्पणसाधनं। स्मृत्य
...स्यागे। अच्चारस्नेन सव्येन दक्षिनतुपाणिना। सव्योनतरास्यां पाणि

स्या तत्पवानर्पणं भवेदिति। अनुशाद्दः पश्चादर्थे पश्चाल्लग्नेनेत्यर्थः। यथाह व्या

घ्रावल्करः। दक्षिणेऽपि स्वतीर्थेन जलं सिञ्चेद्यथाविधि। दक्षिणेनैव गृह्णीया

त्पितृतीर्थेन संयतः। सवर्णस्योदकं देयं नासवर्णस्य एव च। गोत्रं नाम स्व

धाकारैस्तर्पयेदनुपूर्वश इति॥ श्रीधराह्निके योगी॥ अन्वारब्धेन स

व्येन पाणिना दक्षिणेन तु। तृप्यतामिति सेक्तव्यं नाम्नाप्रणवादिनेति।

एवं सव्यनाचारब्धेन पश्चाल्लग्नेन दक्षिणेन कर्तव्यं। नैकेन पाणिना क

र्तव्यं। तथा च स्मर्यते। एककरेण तोयेन यः कुर्यात्पितृतर्पणं। पितरो

न तस्य तृप्यन्ति न च सन्ति देवताः। अत्र केवलेनैकेन कर्तव्यमिति। उभाभ्यां

पि न कर्तव्यं। सव्यहस्तलग्नेन दक्षिणेन कर्तव्यमित्यर्थः। तथा च व्या

प्रचरन्। उभाभ्यामपि हस्ताभ्यामुदकं यः प्रयच्छति। स मूढो याति कालस्य
त्वमिवावाक्शिराः। इति। अयं निषेधो देवर्षितर्पणे ■ इति केचित्। न पितृ
तर्पणे। तत्र हस्तद्वयस्य विधानात्। तथाच योगी॥ श्राद्धे विवाहकाले च पा
णिनैकेन दीयते। तर्पणे तूभाभ्यां तु जलं देयं नु नान्यथेति इति वचन विरोध
स्तत्र यथा शास्त्रं व्यवस्था॥ बह्वृचैः सव्यहस्तलग्नेन दक्षिणेन कार्यं॥ ॥
तथाच स्कान्दे। अव्याहस्तेन सव्येन तर्पयेत्पद्मिनायकान्। ब्रह्मादीन् विवि
१८४ धांदेवान्मरीच्यादींस्तथा मुनीन्॥ इतरे त्वञ्जलिना कार्यं। तथाच वाद १८४
वतास्तर्पयतीत्यत्र साधनस्यानुक्तत्वात् दक्षिणहस्तस्य प्राप्तिः। दक्षि
ण प्रतीयादना देवा इति परिभाषोक्तेः। वसिष्ठो वसिनं भङ्गं स्थलेवि

स्तीर्णे बर्हिषि। विधिज्ञस्तर्पणं कुर्यान्न पात्रे तु कदाचन। योगी। पात्रा
द्वा जलमादाय शुभ्रपात्रान्तरे क्षिपेत्। जलपूर्णेथवा गर्ते न स्थले तु वि
बर्हिषि। यद्गृहे तन्निषिञ्चेत तिलाम्भसा मिश्रयञ्जले। अन्यथा वामहस्ते
स्तु न न तु तर्पणमाचरेत्। नोदकेषु न पात्रेषु न क्रुद्धो नैकपाणिना। नो
पतिष्ठति तत्तोयं यद्भूम्यां न प्रदीयते। विष्णुः। स्थले स्थित्वा जले यस्तु प्र
यच्छेदुदकं नरः। नोपतिष्ठति तत्तोयं पितॄणां तु निरर्थकम्। असंस्कृतप्र
तविषयमेतत्। यथाच कात्यायनः। देवतानां पितॄणां च जले दद्या
ज्जलाञ्जलिं। असंस्कृतप्रमीतानां स्थले दद्याज्जलं पुनः। अनास्तृते स्थ
ले न कर्त्तव्यमिति। अत एव हारीतः। यज्ञाश्चिविः स्थले वाप्युदके देव

ताः पितृन्तर्पयेच्च यथान्यायं सर्वमप्सु प्रतिष्ठितं। त्वादितः। आर्द्रवासा जले
कुर्यात्तर्पणाचमनं जपं। शुष्कवासाः स्थले कुर्यात्तर्पणाचमनं जपमिति। सं
185 ग्रहे। अक्षय्यदानं तथा दानं देवतापितृतर्पणं। जलमध्ये च कुर्वाणः शुष्कश्च
स्त्रो न दुष्यति। व्यासस्मृ। जलस्थयोः समविकल्पमाह। जपहोमव्रतः कुर्या
द्देवर्षिपितृतर्पणं। तस्मिन्नेव जले मन्त्रैः स्थले वा दोषवर्जिते। यमः। स्न
मोय स्तर्पणं कुर्यात् [illegible] स्पलोहेच म[illegible]ये। तर्जन्यङ्गुष्ठयोर्योगे सपु
१८५ त्रः पितृहा भवेत्। अंगिराः। मार्जनं। तर्पणं श्राद्धं न कुर्याद्वारिधार १८५
या। कुर्वन्न यदि मूढात्मा रौरवं नरकं व्रजेत्। होमे तर्पणकाले च
विवाहे श्राद्धकर्मणि। अगर्भाश्चैव ये दर्भाः पुत्रदारधनक्षयाः। पाणि
नैकगुणं प्रोक्तं दर्भैः शतगुणं ततः। तर्पणस्य ... पात्रेण अक्षय्यायोपक

ल्पते। स्वरूपात्र तर्पणमन्त्रवाक्य। विषयं। अनामिकायां घृतं हेमतर्ज
न्यां रोप्यमस्व। कनिष्ठिकायां घृतः खड्गस्तेन हतो भवेन्नरः। योगी।
दर्भपवित्रता अंवाराजतं हेममेवचा। विष्णुषा दक्षिणे पाणौ पवित्रं
वा तरोत्तरं। तिलानामप्यभावे तु सुवर्णरजतान्वितं। तदभावे तु अ
नन्तदर्भैः मंत्रेण वा पुनः। सरज्जस्य चोनवेहाच्चा देवदर्भान्वितवृ
णाः। दद्याद्द्विगुणान्पित्र्ये अपसव्यं च पार्थिवः। सप्तम्यां सप्त
सप्तम्यां रविवारे च जन्मर्क्षे दिवसे गुचा गृहे तिलं सलिलं तर्पणं
न हि सर्वेदा। उद्धृत जलस्नानं पुकारेण वा कौ। स्थल तर्पणं तु पा
त्रस्थे जले दक्षिणा पात्रान्तरे कार्यं। सोदके गर्ते वा सर्वदा हि विरु

ल्लेवा कार्यं। तं स्त्वं तिलतर्पणं न गृहे भवेत्॥ कात्यायनः॥ मघास्युगादौ
त्तरण्यां तीर्थे पर्वे विशेषतः॥ तिलैस्तु तर्पणं कुर्यात् श्राद्धं कुर्यात् प्रयत्न
तः॥ एतच्छास्त्रान्तरविषयं॥ व्यासः॥ अतपक्षे व्यतीपाते संक्रान्तौ तिथि
तिपर्वसु। निषिद्धेपि तिथौ वारे कुर्याद्वै तिलतर्पणं। नित्यायां संध्य
योगे हे मातापित्रोर्दायेहनि। यस्तिलैस्तर्पणं कुर्यात्तमाहुर्ब्रह्मघा
तकं। अत्र स्त्रियाहे तिलग्रहणमुपलक्षणं। केवलमपि तर्पणं न कु
८६ र्यात्। इतरत्र तिलतर्पणं कार्यं। तथा च संवर्तः॥ रविशुक्रत्रयोदश्यां
सप्तम्यां निशि संध्ययोः॥ तिलतर्पणसंयोगात्तज्जलं रुधिरं भवेत्॥ १८६
स्मृतिसारे। भानुवारे भौमवारे न हस्तगुमघासु च। गयादन्यत्र तु स

सप्तम्यां भरण्यां श्राद्धे वाऽष्टसु वा। अयनादि तथैवैव चतसृषु युगादिषु। पिण्डदा
नं मृत्तिकास्नानं न कुर्यात्तिलतर्पणमिति। [illegible] कार्यं। निंबस्य भक्ष
णं चैव तिलैस्तर्पणमंजनं। सप्तम्यां च न कर्त्तव्यं ताम्रपात्रे च भोजनं वा
महस्ते तिलं धृत्वा यः कुर्यात्तिलतर्पणं। देवान्ऋषीन्पितॄन्हंति आत्मना
नरके व्रजेत्। मातृमृत्युव्याख्यायोस्ति तस्य मासां दद्यात्तिलांजलीन्स्त्री
णां न तथा न्यासस्त्रास्तामेकैकमंजलिं। एवमुक्तप्रकारेण प्राङ्मुखो भूत्वा
देवतीर्थेन तर्पयेत्। एकवचने तृप्यतु॥ द्विवचने तृप्येतां॥ बहुवचने तृ
प्यन्तु॥ ॥अथ श्राद्धाहतर्पणनिर्णयः। पूर्वं तिलोदकं दत्वा आमश्रा
द्धं तु कारयेत्। आमश्राद्धं तु सर्वं तु परेह्नि तिलोदकं। संग्रहादर्शे तिलो

दर्कं तर्पं पश्चाद्द्यान्महालये। मातामहवितापित्रोः क्षयेऽप्येवं नोपश्चात्तु परेऽहनि।
सुमंतुः। पक्षश्राद्धे हिरण्ये च अनुव्रज्य तिलोदकमिति। द्रव्यश्राद्धं गं तिलं दद्या
त्रिविद्ध्यपि परेऽहनि। व गैकस्य वा चोग्रेषामन्येषां तु विवर्जयेदिति। कात्यायनः।
ततः परेऽह्नि कुर्वीत तर्पणं पुरुषः सुधीः। तच्छेषोऽस्ति लदर्भैः स्नान स्नात्वा
तु तैः सुधीः। वृद्धवसिष्ठः। वृद्धिश्राद्धे सपिंडे च प्रेतश्राद्धानुमासिके। सं
वत्सरविमोके च न कुर्यात्तिलतर्पणं॥ गार्ग्यः। यस्तु तर्पयति स्नातः हुत्वा श्रा
द्धं परेऽहनि। पितरस्तस्य तृप्तिमायांति न च तु प्यं च वेस्वरा। परेद्युः श्राद्धकर्ता १८७
१८७ स्यां योन तर्पयते पितृन्। अतृप्ताः पितरस्तस्य शापं दत्वा व्रजंति ते। स्नात्वा
नीरं सम्मासाद्य उपविश्य कुशासने। स तर्पयेत् पितृन् सर्वान् स्नात्वा च स्वयं च

रयेत्। नैवश्राद्धदिने कुर्यात्तिलैः स्वपितृतर्पणं। श्राद्धं कृत्वा परेह्न्येव तर्पणं
तु समाचरेत्॥ इति श्राद्धदिने तर्पणनिर्णयः॥ ॥अथ ब्रह्मयज्ञः। आचम्य स्वोपयज्ञो
पवीती प्रजापतिरित्यादि एवमंत्रजातमनैतेकोनत्रिंशद्वाक्यैर्देवताः कुशान्
तिलैस्तर्पयेत्। प्रथममग्निर्विष्णोश्च कार्यमिति स्वके। अथ निवीती उदङ्मुखः
प्राजापतिप्रभृतीन् द्वादशर्षीन् तीर्थेन तर्पयेत्। अत्र षिवाक्यभेदः पूर्ववत्।
अत्र वक्तुरितिल्यः। तथैव सनकादीन्सप्तमनुष्यांस्तर्पयेत्। तथावाक्यानिके।
सनकश्च सनंदश्च तृतीयश्च सनातनः। कपिलश्चासुरिश्चैव वोढुः पंचशि
खस्तथेति। अथ प्राचीनावीती दक्षिणाभिमुखः। सुमंत्वित्यादि च योविं
शतिवाक्यैः पितृतीर्थेन कृष्णतिलैस्तर्पयेत्॥ ॥अथ पद्ययोगः॥ ॥
ॐ अग्निस्तृप्यतु। विष्णुस्तृप्यतु। प्रजापतिस्तृप्यतु। ब्रह्मा तृप्यतु॥ ॥

वेदास्तृप्यंतु। देवास्तृप्यंतु। ऋषयस्तृप्यंतु। सर्वाणिछंदांसि तृप्यंतु। ॐकारस्तृप्यंतु। वषट्कारस्तृप्यंतु। व्याहृतयस्तृप्यंतु। सावित्रीतृप्यंतु। यज्ञास्तृप्यंतु। द्यावापृथिवी तृप्येतां। अंतरिक्षं तृप्यतु। अहोरात्राणि तृप्यंतु। संख्यास्तृप्यंतु। सिद्धास्तृप्यंतु। समुद्रास्तृप्यंतु। नद्यस्तृप्यंतु। गिरयस्तृप्यंतु। क्षेत्रौषधिवनस्पति गंधर्वाप्सरसस्तृप्यंतु। नागास्तृप्यंतु। वयांसि तृप्यंतु। गावस्तृप्यंतु। साध्यास्तृप्यंतु। विप्रास्तृप्यंतु। यक्षास्तृप्यंतु। रक्षांसि तृप्यंतु। भूतानि तृप्यंतु। एवमेतानि तृप्यंतु। अथ निवीतं कृत्वा निवीतं कंठ लंबितं॥ १०॥ कृ॥ १८८ ॥
१८८॥
द्वैपायनस्तृप्यतु। माध्यमास्तृप्यतु। गृत्समदस्तृप्यतु। विश्वामित्रस्तृप्यतु। वामदेवस्तृप्यतु। अत्रिस्तृप्यतु। भरद्वाजस्तृप्यतु। वसिष्ठस्तृप्यतु। प्रगाथास्तृप्यंतु। पावमान्यास्तृप्यंतु। क्षुद्रसूक्तास्तृप्यंतु। महासूक्तास्तृप्यंतु। सनकस्तृ

ना नंदनस्तृ[illegible]तु। सनातनस्तृप्यतु। कपिलस्तृप्यतु। आसुरिस्तृप्यतु। वोढुस्तृप
तु। पंचशिखस्तृप्यतु॥ अथ प्राचीनावीती॥ सुमंतुजैमिनिवैशंपायनपैल
सूत्र भाष्य भारत महाभारत धर्माचार्यास्तृप्यंतु। जानंति बाहवि गार्ग्य गौतम
शाकल्य बाभ्रव्य मांडव्य मांडूकेयास्तृप्यंतु। गार्गी वाचक्नवी तृप्यंतु। वडवा
प्रातिथेयी तृप्यतु। सुलभा मैत्रेयी तृप्यतु। कहोळं तर्पयामि। कौषीतकं त
र्पयामि। महाकौषीतकं तर्पयामि। पैंग्यं तर्पयामि। महापैंग्यं तर्पयामि। सुयज्ञं
तर्पयामि। सांख्यायनं तर्पयामि। ऐतरेयं तर्पयामि। महैतरेयं तर्पयामि। शा
कलं तर्पयामि। बाष्कलं तर्पयामि। सुजातवक्त्रं तर्पयामि। औदवाहिं तर्प
यामि। महौदवाहिं तर्पयामि। सौजामिं तर्पयामि। शौनकं तर्पयामि। आश्व
लायनं तर्पयामि। ये चान्ये आचार्यास्ते सर्वे तृप्यंतु। अथ नाम गोत्रोच्चा

र्यं स्वधा पितृन्नमस्स्वधानमस्तर्पयामीति तर्पयेत्। कर्मान्तेनो मंत्राद्युद्वि
र्तीनव्या। देवासुरास्तथा यक्षा रक्षो गंधर्वकिंनराः। पिशाचा गुह्यकाः
सिद्धाः कूष्मांडास्तरवः खगाः। जलेचरा भूमिचरा वाय्वाहाराश्चजंतवः। तृ
प्तिमेतेन यांत्वाशु मद्दत्तेनांबुनाखिलाः। नरकेषु समस्तेषु यातना
189 सु च ये स्थिताः। तेषामाप्यायनायैतद्दीयते सलिलं मया। ये बांधवा बांध
वा ये न्यजन्मनि बांधवाः। ते सर्वे तृप्तिमायांतु यश्चास्मत्तोभिवांछति। आ १८४
१८४ ब्रह्मस्तंब पर्यंतं जगदेतच्चराचरं। मयादत्तेन यत्तोयेन तृप्यतेन तश्चतुर्वि
धं। अतीतकुलकोटीनां सप्तद्वीपनिवासिनां। आब्रह्मभुवनाल्लोका
दिदमस्तु तिलोदकं। ये केचास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः। ते गृ
ह्णंतु मयादत्तं वस्त्रनिष्पीडनोदकं। एतदसंस्कृतगमीतोदकेस्थल

एवंदर्भादिस्थितंभवतिपूर्वमेव। गर्ते वाथ भुवोरेखां निक्षिपेत्तर्पणोदकं।
अन्यत्र निक्षिपेद्यस्तु पितृहा स तु जायते। शंखः। एवं यः सर्वभूतानि तर्प
येदन्वहं द्विजः। स गच्छेत्परमं स्थानं तेजोरूपमनामयं। पितृकर्मोपरपक्षे
श्राद्धं वक्ष्यते। कारिका। अयं तु ब्रह्मयज्ञोस्य त्रिसंध्यायां दानादि दक्षिणा। कु
र्यात्तिष्ठन्नध्याये नो वा। ब्रह्मयज्ञमसं भवेत्। देवो भविष्यस्यैव वाक्यात्तदा
न ध्यानमिष्यते। प्रागूर्ध्वं वा भवेज्ज्ञाये वैश्वदेवाख्यकर्मणः। ऊर्ध्वमेव तु यत्तो
स्यात्तस्मादतिथिभोजने। नारायणः॥ सव्यास्तो तर्पणादर्वाक् पश्चाद्वा प्रातरा
हुतेः। वैश्वदेवावसाने वा ब्रह्मयज्ञो विधीयते। वृद्धिकार्यो। यदि स्यात्तर्प
णात्पूर्वं ब्रह्मयज्ञः कृते हनि। हुत्वा मनुष्ययज्ञं वै ततः स्वाध्यायमाचरेदिति।

यस्य पंचमहायज्ञाः प्रवर्त्तंते गृहस्वरान्तगृहे सर्वे तीर्थानि सदा तिष्ठंति सो।
नकः। पंच यज्ञाश्चयेमोहान्नचरेति गृहाश्रमी। तस्य नायं च न परो
लोको भवति श्राध्यतः। एतेभ्यः पंचयज्ञेभ्योपद्येवोपि विहीयतेम
170 नस्वयाहुतिस्तस्य प्रायश्चित्तं विधीयते। एवं द्व्यहस्त्र्यहं वा पित्रमादा
दकृते तु। तिस्रस्तंतु मतिकृत्यावतत्सौ वारुणी जपेत्। दशाहं वा
१७० दशाहं वा निवर्त्तेषु च सर्वतः। वतत्सौ वारुणी कृत्या कार्यस्तंतु मतैच १७०
रुः। अहत्वाग्न्युत्तमं यज्ञं पंचानाचाश्वकादिकं च। उपवासेन शुद्धिः
स्यात् सुमंते मतमीदृशं। संग्रहे॥ वैदिकानां तु नित्यानां कर्मणाम
तिक्रमे। स्नातकव्रतलोपे च प्रायश्चित्तं तु भोजनं॥ इति [illegible]।

॥ अथोपाकर्म॥ तत्रेदं गृह्यसूत्रं॥ अथातोध्यायोपाकरणमोषधीनांप्रादुर्भा
वे श्रवणेन श्रावणस्य पंचम्यां हस्तेन वेति। अत्र कालत्रयमुक्तं। श्रावणमासस्य
श्रवणे कार्यं। अथवा तन्मासे हस्तयुक्तायां पंचम्यां कुर्यात्। यदा तन्मासे अप्र
रूढा ओषधीयो भवंति तदा भाद्रपदे श्रवणेन हस्तेन वा कार्यं। तथा च कारिका॥
अप्ररूढा ओषधयस्तस्मिन्मासे भवंति चेत्। तदा भाद्रपदे मासि श्रवणेन करोति तं
इति। तथा च स्मार्यते। न च श्रावणमासे वा पितृपक्षे यथाविधिः। वेदारं
भं ग्रहणे वीतं अन्यथा दोषवान्भवेत्। यदा मासद्वये पि उपाकर्मकालालाभ
स्तदाषाढे मासे कार्यमित्याह सत्यव्रतः। यदि मासद्वये चेत्स्यादाषाढ्यां
तैत्तिरीयकाः। बह्वृचः श्रवणे कुर्युर्हस्ते च कर्कटे रवौ। अंगिरापि। सिंहे रवौ
श्रावणे तु कन्यायां प्रोष्ठपादिके। आषाढे कर्के वापि वेदारंभं द्विजातयः।

अत्र बृहस्पतिना विशेष उक्तः। नर्मदोत्तर नागेन्द्रवक्त्रे त्र्यक्षं सिंहगुरौ ... कर्कटे सं
स्थिते भानावुपाकुर्यात्तु दक्षिण इति निगमे। श्रावण्यां प्रोष्ठपद्यां वाऽऽप्रतिपन्न
ग्रस्तु त्र्यके तर्कैः। विद्वांस्पोत्तु दर्शान्ते नोपाकर्मो ... र्जनं चरेत्। अपरं चा श्रावणी
पौर्णमासी तु संगमात्परतो यदि। तदेवोदयिकी ग्राह्या नान्यदोदयिकी भवेत्।
पर्वण्योदयिके कुर्युः श्रावणं तैत्तिरीयकाः। बह्वृचाः श्रवणे कुर्युर्ग्रहसंक्रां
तिवर्जित इति यदुक्तं न चैवं व्यवस्था। गर्गः।। अर्द्धरात्रादधस्तात्तु संक्रांति
ग्रहणे भवेत्। उपाकर्म न कर्तव्यं पुरतश्चेन्न दोषकृदिति। धनिष्ठासंयुतं योगो १९१
१९१ गृहीतोऽग्नि उत्तराषाढा च यो निषिद्धोऽस्ति। श्रवणेन तु यत्कर्म उत्तराषाढ
संयुतं। संवत्सरकृतोऽध्यायस्तत्क्षणादेव नश्यति। वाजसनेयकानां रिकां।। अथ वा
च: पौर्णमासी च संगवस्पृग्यदा भवेत्। तदेवोदयिकी ग्राह्या नान्यदोदयिकी

कार्यिता। ग्रहसंक्रान्तिरहिता: श्रवणपर्वकरा:क्रमात्। परविद्धा उपादायस्त
ऋक्‌सामयजुषामिति:। उपाकर्मणि निशुर्वाह्णे वेदेवानामिति निश्चनेः। उपाकर्म
पूर्वाह्णे कुर्यादिति। सामगैः अपराह्णे कार्यं। तथाव स्मर्यते। शुक्लपक्षे तु
हस्तेन उपाकर्म पराह्णिकमिति। देवलः। उपाकर्मोत्सर्जने च वनस्थानाम
पीष्यते। धारणाध्ययनांगत्वात् गृहीणां ब्रह्मचारिणां। स्नातिसामसमुच्च
य। यज्ञोपवीतं कर्तव्यं श्रावणे गुरुशुक्रयोः। मौढ्ये पि वार्द्धके बाल्ये नित्य
वत्कर्म चोदितं। गुरुभार्गवयोर्मौढ्ये बाल्ये वा वार्द्धकेऽपि वा। तथाधिमास
सं सर्पमलमासादि दिद्वैः। अथ मोपहा निर्नस्यात् तत्कर्म विनावाह्नम्।
आचार्यः। कार्यमास्फुदयथा रुं श्रौतस्मार्तेच कर्माणि। कारिका। कर्मद्वयमि
दं केचित्‌ तौ विवाँ कारनोप्र कुर्वंतदीति।। अथ प्रयोगः।। आचम्य प्राणानायम्य।।

तिथ्यादिकं संकीर्त्य॥ अधीतानां अध्येष्यमाणानां अस्खानो ह्यासविच्छेद
कोत्साघोषणहतक स्वञ्चारितवर्णानां ह्रस्वसवर्णागमलोपविलंबितद्रु
स्वञ्चारितवर्णानां श्लिष्टवर्णविघट्टनादिभिः। आमादिकैः अतीनो यज्ञा
नं यानयामत्वं तत्परिहारार्थं सर्वेषां छन्दसामाप्यायनार्थं सवीर्यत्वार्थं
च नयोपनीतानां वेदग्रहणाधिकारार्थं इतरेषां तु स्पृष्टानां वेदानां पुन
र्ग्रहणार्थं यथावदधीतमेवाराविस्तेन यद्यदृवतो पासनया ओतस्मा
१९२ त्रैयम्बोनुष्ठान यावत् फलप्राप्त्यर्थं उपाकर्माख्यं कर्म करिष्ये॥ उत्सर्गे वाय १९२
ड्योगः॥ उल्लेखनाद्यग्निप्रतिष्ठापनान्तं कृत्वा पुनर्देशकालौ संकीर्त्य
न्यादिक्रियमाणे उपाकर्म होमे चाधानं करिष्ये देवतापरिग्रहार्थमस्मि
न् आहितेनौ वित्यादि चक्षुषी तत्र स्वाप्रधानदेवतावदन्॥ श्री॥

सावित्रीं। [illegible]णं। श्रद्धां। मेधां। प्रज्ञां। धारणां। सदसस्पतिं। अनुमतिं। छंदांस्य-
षीन्। आज्यद्रव्येण। तथा अग्निं। अघूर्णस्वयम्। अग्निं। वाक्रुंतपश्चिमरूपं इं।
अग्निं। मित्रावरुणौ। अग्निं। आपः। अग्निं। मरुतः। अग्निं। देवब्रह्मवर्माणि। अग्निं।
इंद्रासोमौ। इंद्रं। अग्निं मरुतः। सोमपवमानं। पवमानसोमं। अग्निं। संज्ञानं।
दधिसक्तुद्रव्येण वाषेण स्विष्टकृतमग्निपवमानं यज्ञोपवीतेन धमस्नेह-
नेन रुद्रमित्यादि सर्वायश्चित्तं इति संकल्प्य समिधावग्नतावाधाया इमसंस्का-
रातं कृत्वा ज्येन दधिसक्तूनां पर्यग्निकरणं कृत्वा ज्योन्भूर्व लो सतितेषां त्रिः
प्रोक्षणं हुत्वे धमाभिघारणां तं वा त्वा रक्षः त्रिषि च क्ष्यतं हुत्वा सावित्र्या
च नेवीभि मंत्रे राज्यं कुर्यात् अग्निमीळे इत्यादिवि वाति भि मंत्रे दधिसक्तुं जुहु-
यात्॥ अग्निमीळे इत्यस्य वैश्वामित्रो मधुच्छंदा अग्निर्गायत्री। प्रधान

चरुहोमे।०। कुम्भको मे त्र्यावरुणिरगस्त्यो न्त्र्ण सूर्या अनुष्टुप्। अत्रोपनिषद्व
ह्रोथो [illegible]तस्यार्थः। उपनिषत्। रहस्यं गोप्यमित्यर्थः। धर्मे रहस्युपनिषदित्य
मरः। उपनिषीदत्यस्य त्युपनिषत्। त्वमग्ने द्यौ न [illegible]गस्त्सम दोग्निर्जगती।
आवदन्त्वत्समदः शौ ॐ नवे रूपं क्षो ऽज गती। अ स्तोमस्य गाथिनो विश्वामि
त्रोग्निस्त्रिष्टुप्। गणानां भागं वो ऽज मदग्निर्मित्रावरुणौ गायत्री। त्वां ह्यग्ने
गोतमो वामदेवोग्निरक्षी। ७।। यामं ते वामदेव आपो ऽजगती। अबोध्य
१९३ ग्नि रात्रेयो बुधगविष्ठिरावग्निस्त्रिष्टुप्।५। गं नान आत्रेय एवयाम १९३
रुन्मारुतमिति जगती। त्वं ह्यग्ने बार्हस्पत्यो नरद्वाजो ऽग्निस्त्रिष्टुप्।६।
सोमस्य पायुर्द्व ब्रह्मवर्मा त्रिष्टुप्। अग्निनरो वसिष्ठोग्निर्विराट्।७।
धृतेव [illegible] रक्षो [illegible] सोमानुष्टुप्। माविदित्यस्य [illegible]

सः सादृशात्म्यात्रिमद्भुत्रस्य कण्वः प्रगाथ ऐंद्रो बृहती ।८। आग्ने याहि काण्व सो
भरिरग्निरनुष्टुप् ।। त्वादिष्ठया मधुच्छंदाः पवमानसोमो गायत्री ।९।। यत्ते
राजन्मरीचः कश्यपः सोमः पंक्तिः । अयं बृहन्नात्यस्त्रितोऽग्निस्त्रिष्टुप् ।१०।
समानीव आंगिरसः संवननः संज्ञानमनुष्टुप् ।।२०।। कारिका ।। शाकलानां स
मानीव इत्यस्यांत्याहुतिर्भवेत् ।। शौनकः ।। शाकल्पबाष्कलाचार्यसंहिताद्वि
तयांतिका । अथौ समानीव इति तत्त्वं योरिति याश्रुते । नाष्यां यथाक्रमं सास्वि
ष्टकृद्धोममाचरेत् । जयते न विंशतिभिरेव त्वग्निर्होममुक्तो स्मिन्कर्म द्वये । ततः
स्विष्टकृत् ।। अथ परत्र । सो विष्टकृतं जुहुतेति । स्विष्टकृद्ग्रहणं कथं । अथ प्रधा
नानंतरमेव स्विष्टकृतं । न कर्मांते । कुतो हि कर्मांते शान्तेः प्रत्यवरोहणात्स्वक
र्मणि नात्र सो विष्टकृत्यस्मिन्कर्मत्रे अग्रग्रहणं सतं तेनान्यत्र प्रधानान्तक

र्गनेवास्यात्। अत्र दधि सक्तु प्राशनं यज्ञोपवीतपरिग्रहणं कुर्यात्। संग्रहे।
प्राशनं दधि सक्तूनामुपवीतपरिग्रहः। मार्जनं वेदसंबंधो भवेत्क्वचित्॥ कृ
ते हुते गालवेन यज्ञोपवीतानि नवानि हुत्वा। तदुक्तमंत्रेण कुर्यात्तथाग्नौ। स्व
यं तु देवात्मपितृभ्यस्तु दद्यात्स्व यथार्थमितिप्रसिद्धं। एवं सशिष्यो गुरुः द
धि सक्तून्प्राश्य यज्ञोपवीतानि कृत्वा दत्वा वधारयेत्। ततः मार्जनं कुर्यात्।
तत्र कारिका॥ परिस्तरणदर्भैस्तैरत्र दधि निते जके। अन्यनस्से वर्षिस्वापः
स्ताभिः कुर्वंति मार्जनं॥ अथ प्रयोगः। परिस्तरणदर्भाणाम मध्यस्थं विहितेज
१९४ लो। अपामार्गेण यन्मार्जनं संजवक्ष्यते। मार्जयित्वानुयाजेष्विति १९४
पश्चाद्रुचेस्तद्दर्भैः षु प्रागग्रेषु पवित्रयष्ट्या। आसिस्वापः चारावादे दर्भाँ
स्तत्र निधाय च। प्रागग्रदर्भगर्भास्ते कुर्युर्ब्रह्मांजलीन् तथेति। ततः गायत्रीं शिर

क्षा वेदारं न कुर्यात्॥ कारिका। सव्याहृती उपं स्पृष्टैः सावित्री ब्रह्म पद्रवत्।
त्रिरस्यसे तुरोंकारं व्याहृतीश्चा त्रकर्मणा ति। ततः एवं गायत्री वदेत्॥ ॐ
भूर्भुवस्वः चरणाः। ॐ भूर्भुवस्वः। अ ई यौ।२। ॐ भूर्भुवः स्वः अनवसा
नीयः सप्त।२॥ ततो वेदादिमारभेत्॥ अग्निमीळे इति सूक्तमनुवाकं ततः
अग्निर्वै देवानामवमो विष्णुः परमः। अथ महाव्रतं। एष पंथा एतत्कर्म। अ
थातः संहिताया उपनिषत्। विदामघवन्विद्या। महाव्रतस्य पंचविंशतिं सा
मिधेन्यः। अथैतस्य समाम्नायस्य। समाम्नायः समाम्नातः। अथ शिक्षां
प्रवक्ष्यामि। पंचसंवत्सरमयं। मयरसतजभनलगसंमितं। गौः। ग्मा। वृद्धि
रादैच्। इषे त्वोर्जे त्वा। अग्न आयाहि वीतये। शन्नो देवीरभिष्टये। अथा
तो धर्मजिज्ञासा। अथातो ब्रह्मजिज्ञासा। नमो ब्रह्मण इति स्वेतस्त्रिवारस्तु

प्रणवं वदेत्। अत्र ब्रह्मचारिविषये विशेषो पठ्यते। बालादर्शी मौंजीयज्ञोपवीतं
च नवं दण्डं च धारयेत्। कात्यायनेनैव नवं नवं स्यात् तथैव वा व्यासः। उपवीतं
नवं वस्त्रं कात्यायन्ये च मेखलां। धारयेदजिनं दण्डं पुराणान्यप्सु निक्षिपेदिति।
195 एतद्दण्डादिधारणे तूपवीतपरिग्रहः। कालेऽन्येऽपि। प्रायश्चित्तादि होमं शेषं स-
मापयेत्। यदा कर्मद्वयमेककाले तु तदा उत्सर्जनं कृत्वा पश्चादुपाकर्म कु-
र्यात्। अस्य कर्मणः फलमाह कात्यायनः। अध्यायानामुपाकर्म सोत्सर्ग
विधिनैव द्विजैः। क्रियते कर्म येनेतेन पुनराप्यायनं भवेत्। दोष एवमेव। १९५
१९५ उत्सर्जनं वेदवानामुपाकरणमेव च। अहोरात्रं द आप्नेन फलमुपमानतो
निमानवः। बालिका। अनध्यायात्स्मृतो सिद्धान्तादिह तत्त्व प्रीयते। यस्त्वं
सर्वं म चीनसौ प्रारभेत भवेत् हानिः। समावर्तो रे पञ्चीयानामथ कमासाः।

दिवर्जयेत्। अतोस्मानोपनमन मन्ये तस्यानुमन्यते। अतऊर्ध्वं षण्मासा
न्नियमेनत्वधीयते॥ ॥इत्युपाकर्म॥ अथोत्सर्जनं। अध्यायोत्सर्जनं मा
घ्यां पौर्णमास्यां विधीयते। उपाकर्म दिनेपि वा। ग्रामाद्बहिर्दिविस्तृ वा
स्यादुपलेपादि पूर्ववदिति। प्रयोगः पूर्ववत्। उपलेपाद्यग्निं प्रतिष्ठाप
नांतं कृत्वा। कारिका। गृह्यपचकुसमीपे तं निधायाज्यमधिश्रये। सं
स्कार्यं सक्तुवत्स्थानं शांतिकर्म नि चान्वयानवाज्याकृतिपर्यंतं मुपाक
रणवद्भवेदिति। प्रहृतं। क्रियमाणे होमे न्वाधानं करिष्य इत्यादि पूर्ववद
न्वाधानं कुर्यात्। अत्र दधिसक्तुवाक्षिकुचरो पर्यग्निकरणं त्रिः प्रोक्ष
णं च भवेत्॥ प्रधानहोमः॥ पूर्ववत्। सक्तुस्थाने सिद्धवरुरिति विशेषः॥

स्विष्टकृतं च कर्णा कुर्यात्। अग्र प्राशनमार्जनेन स्तः।२ ॐ च कृत्वा वे
दाधारं न कुर्यात्। तथा च कारिकायां। वेदाधारं भणं हस्त्यादि वि
19६ षं कर्म समापयेत्। वेदारंभ एवंविधः। तत्रेदं सूत्रं॥ ॐ पूर्वो व्या
हृतयः। सावित्रीं च त्रिरभ्यसेत्। अस्यार्थः। पूर्वमों वारक्तातस्ति
स्त्रो व्याहृतयः समस्तास्ततः सावित्री। एतत्त्रयं त्रिरभ्यसेत्। वक्रा
धुः प्रणव व्याहृतीनामस्यासार्थः। तृतीयवचनं पक्षोर्द्धं चे वार १९६
१९६ स्योदि क्रमो ब्रह्मयज्ञे सर्वामिति तृतीयमिति सूत्रे ज्ञापितो हि निह
तो कथं तृतीयवचनं। पक्षोर्द्धं वेदो नवा नमित्येवं त्रिभ्याया दि
त्येवमर्थः। अनवानमवसानीयमित्यर्थः॥ अथ वेदादीन्॥

अग्निमीळे इत्यादि सूक्तमनुवाकं वा आरभेत ततः। अग्निर्वै देवानामवमो वि
ष्णुः परमः। अथ महाव्रतं। एष पंथा एतत्कर्म। अथातः संहिताया उपनिषत्।
विदा मघवन्विदा। महाव्रतस्य पंचविंशतिं सामिधेन्यः। अथैतस्य समा
म्नायस्य। समाम्नायः समाम्नातः। अथ शिक्षां प्रवक्ष्यामि। पंचसंवत्सरम
यं। मयरसतजभनलगसंमितं। गौः। ग्मा। वृद्धिरादैच्। इषे त्वोर्जे त्वा। अ
ग्न आयाहि वीतये। शन्नो देवीरभिष्टये। अथातो धर्मजिज्ञासा। अथा
तो ब्रह्मजिज्ञासा। नमो ब्रह्मणे इति त्रिरुक्त्वा जपन्वेदं। ततो होमशेषं स
मापयेत्। अथातो यानि तीरे गत्वा स्नात्वा अभिषिञ्चयेत्। तारयित्वा। अथ
तीरमरणं गत्वा तत्र गाहयेत्। ततो जलं। उपाकर्मणि चोत्सर्गे गौतमादीन्यस
नवै। अथाभीन्द्रमं मयान्हुत्वा प्रजायेत्तर्पयेत्ततः। बोधायनोपि। गौतमादी

न्दृऋषीन्सप्तं सत्वादर्भ मया मुनः। पूजयित्वा यथाशक्तितर्पयेद्धं शम्भुद्
रेतः॥ ॥अथ ऋषिपूजनं॥ तिथ्यादिवं स्मृत्वा अस्माकं समस्तपापक्ष
यार्थं ऋषिपूजनकल्पोक्तफलप्राप्त्यर्थं उत्सर्जनं विहितम्ऋषिपूजनं क
रिष्य इति संकल्प्य षोडशोपचारैः पूजयेत्॥ कश्यपोऽत्रिर्भरद्वाजो विश्वा
मित्रोऽथ गौतमः। जमदग्निर्वसिष्ठश्च सप्तैते ऋषयः स्मृताः। सप्तऋष
यः ॐकाराज्ञेष्ठा सर्वेषां तु ॐ भूप्रदाः। सर्वपापक्षयो हेतु अज्ञानात्ज्ञानत
१९७ स्तेता। पूजामन्त्रः। व्यासः। विष्टरं सप्तभिर्दर्भैर्ह्रदर्क्षो न्युलदीर्घकैः। व १९७
तुरंगुलमग्नं स्याद्ग्रथिमेकांगुलस्तथा। प्रदक्षिणावर्त्तसंस्थं प्रश्रविना
बाहुं पूजयेत्। ऋषिणाम वर्तनं सव्यं तर्पयेच्च निवीतिना॥ आसनं
पाद्यमर्घ्यं च स्नानं पंचामृतैः पृथक्। वस्त्रोपवीतगन्धांश्च पुष्पाण्या

नरणान्निया। धूपदीपवलीं दत्वा तां कुलं च विसर्जनं। तर्पयित्वा यथान्या
यं वेदोक्त विधिना ततः इति। वेदानुद्दिश्य यत्स्यानं तर्पणं अपि पूजनं॥
सर्वे सर्वे अकर्तव्यं तेन न्यायः प्रवर्त्तते। ततः सावित्र्याद्येकोनविंशद्देवता
स्तर्पयेत्॥ कारिका॥ सावित्र्यादीनवान्याद्या देवतास्तर्पयेदथेति। सा
वित्रीं तर्पयामीति तर्पयेत्॥ जयं तस्याग्निमीलादिमंत्रैस्तर्पणमप्रवी
त्॥ अथ ब्रह्मयज्ञांगतर्पणं कुर्यात्॥ कारिका। ब्रह्मयज्ञांगमुक्तं यत्तर्पणं स्या
दिहामितद्दिति॥ अथ यमतर्पणं॥ मम समस्तपापक्षयद्वारा धर्मराजप्री
त्यर्थं यमतर्पणं करिष्य इति संकल्प्य। दक्षिणामुखः सव्योपवीती देवतीर्थेन
तिलसहितैर्जलैस्त्रिस्त्रिः धर्माय नमः। यमं तर्पयामीति तर्पयेत्॥ एव
मुत्तरत्र यजेयं॥ यमं। धर्मराजं। मृत्युं। अंतकं। वैवस्वतं। कालं। सर्वभू

नक्षयां। औदुंबरं। दध्नं। नीलं। परमेष्ठिनां। दक्षोदरं। पिंगं। चित्रगुप्तं॥२७॥
स्मृतिसारे। यजुर्वेदेनैते मंत्राः स्युः प्रत्येकंतु नमोन्तिताः एकैकेन तिलैर्मिश्रा
दद्यात्त्रीन्तुदकांजलीन्। यज्ञोपवीतिना कार्यं प्राचीनावीतिनां तथा। देव
त्वं च पितृत्वं च यमस्यास्ति द्विरूपता। हेमाद्रौ। उपाकर्मापराह्णे स्यादुत्स
र्गः प्रातरेवतु॥ गोभिलोपि। अध्यायानामुपाकर्म कुर्यात्कालेपराह्णिके। स
र्वाह्णेतु विसर्गः स्यादितिवेदविदो विदुः। यदा तु उज्झनं पूर्वस्यां त्र दैवो
पाकर्मापराह्णे स्यात्तु। एकमेव क्रियते तदा पूर्वाह्ण एव च॥ अथकारि
१९८ का। अत ऊर्ध्वं षण्मासान् षडंगानि स्वधीयते। भुक्त्वेव दानध्यीयान ह १९८
ङ्गानीति केचन। कर्मद्वयमिदं केचिल्लौकिकेग्नौ प्रवर्त्तते॥ इत्युक्त
त्वेन। अथानध्यायः॥ पक्षद्वये यजुर्वेदस्यापि सप्तमे ह्नि न यंन तथा। प्रति

...ष्ठिनः । रात्रौ तु नवनाडीषु चतुर्थ्यां यदि दृश्यते । प्रदोषो स तु विज्ञेयो वेदाध्ययनवर्जित...
प[illegible]तये चैव तथापस्तंतयोरपि । मन्वादौ च युगादौ च नाधीयीत कदाचन ॥ युगा
दिमन्वादिलक्षणं श्राद्धप्रकरणे वक्ष्यते ॥ गर्गः ॥ रात्रौ यामद्वयादर्वाक् सप्तमी
स्यात्त्रयोदशी । प्रदोषः स तु विज्ञेयो वेदाध्ययनवर्जितः ॥ स्मृत्यन्तरे च ॥ चतुर्थी या
ममात्रान्तु सार्द्धयामात्तु सप्तमी । त्रयोदशी प्रदोषस्याद्यामद्वयनिवेशिनी । गर्गः ।
अध्यायानामुपाकृत्य श्रावण्यां श्रवणेन वा । यावन्मासं शर्वं रात्रौ नाधीयीत क
दाचन ॥ आपस्तंबोपि ॥ श्रावण्यां पौर्णमास्यामुपाकृत्य मासं प्रदोषो नाधीयीत
प्रदोषः । पूर्वरात्रः । अत्रिः । प्रातःसंध्या त्रिनाडी स्यात्सायं संध्या त्रिनाडिका । सा
यं प्रातः संध्ययोश्च नाधीयीत कदाचन । ऋष्यशृङ्गः ॥ जननाद्दशरात्रं स्यादाशौचे च
समुपस्थिते । नाधीयीत द्विजो नित्यं तावदाकालिकेषु च । उपाकर्मणि वेदानाम
नध्यायस्त्र्यहं भवेत् । उत्सर्गेध्यायने द्वितीये पक्षिणी दिनं । आरण्यकस्य वेद

स्य समासौ वा अहं भवेत्। दशाहस्य पंचमा वास्तु सत्तंत्राणां वा अहं भवेत्। तंत्राणां स
हिताब्राह्मणारण्यकादिनां। मनुः। उक्तमेतु प्रथमाध्याये अनध्यायस्त्र्यहं भवेत्
धारणाध्ययनादौ तु पक्षिणी दिनमेव वा। विश्वामित्रः। समाप्य वेदं अहं चानध्ये
दाध्ययनं वरेत्। आद्याध्याये द्वितीये तु दिनमेकमिति स्थितिः। स्कन्दपुराणे।
आषाढी कार्त्तिकी चैव फाल्गुनी तु गते तथा। नाध्येयं तद्द्वितीयासु मन्वादिषु यु
गादिषु। भरण्यामुत्तपक्षस्य चैत्रे तपस्ये तु निर्गते। नाध्येयं तद्द्वितीयायां द्वादश्यां
१९९ श्रवणेपि च॥ गार्ग्यः॥ शुचावूर्जे तपस्ये च या द्वितीया विधुक्षये। चातुर्मास्याः द्वि १९९
तीयास्ताः प्रवदंति महर्षयः। आश्वयुक्कृष्णपक्षस्य द्वितीयापीति संज्ञिता।
चैत्रे तपस्ये तु भरणी महाभरणिरुच्यते। नाध्येया तद्द्वितीयास्तु भरण्यां च युगा
दिषु। अयने द्वितये चैव विषुवद्वितये तथा। अनध्यायस्तावत्सर्वेषा मन्वादिषु

षट्कास्तु च। तुलामेषयो विषुवं। अनयोर्विषुवे चैव नाधीयीतैव पक्षिणी
विरुद्धा मिथः। निशि संक्रमणे भानोः स्वाध्याये परिवर्जयेत्। पूर्वोत्तरार्द्धद्विदि
तयीं दिवासंक्रमणेति। रात्रिसाम्यसमये एषास्त्रिच तुर्ष्वपि क्रमात्तु षट्
चतुस्त्रिस्त्र्यपि। स्वाध्यायमनध्यायस्य लक्षणं। स्वाध्यायस्याह्नेनध्याय यदि स्ये
अथावधि। मुहूर्त्तं हि नथा विधि। स्याकिंचिदपि नैप्राङूरनध्यायस्य ज्ञास्यते। स्वाध्या ये
दिवसे अनध्यायतिथिमुहूर्त्तादि पाठपरिकिंचिदपि स्याज्ञमनध्याये प्राङूरियथः। बो
धायैनोपि। यद्यनध्यायदिनप्राप्तावपि स्वाध्यायादिने हि नियमुहूर्त्तात् ऊपरि निमित्तवि
ध्या २ षयेनध्यायः। विषयमनर्थप्राङ्नुति विज्ञायते। गर्गः। अनध्यायत्रिधैव घेयावेच्च हिन
नाडिकाः। तान्हित्वा दिवसं सर्वं धारणाचमेनं वरेत्। अनध्यायस्य प्रवेषु रनध्यायो भवेन्नि शि।

अनूराधार्सनामाख्यषोडशार्क्षेषु भास्करः। यावच्चरति तावच्च कालं मुनयो विदुः। विहितं
निरुष्टीनां सन्निपातोयदाभ्रवेत्। तदाप्यहमनध्यायमिति वेदविदो विदुः। यमः। याव
द्दर्भपिञ्जूरिमं तावद्धानेदु भोजनं। नवश्राद्धे मासिके च अनध्यायः स्मृतो बुधैः। प
पादास्तु चैकहं ज्येष्ठे स्मृते तादृद्वितीये च आश्विने दशमी चैता स्तु थी द्वादशीमाघस्य:
योम पञ्चाः स्मृताः। इत्यनध्यायप्रकरणं।। अथ यमतर्पणं। भुरण्यां रविवारे च भामके
तु विनिशीतो यमतर्पणं। यदुक्तं। यायात्सर्वपापैः प्रमुच्यते। दीपोत्सवे चतुर्दश्यां का
र्यं च यमतर्पणं।। मम समस्त पापक्षयद्वारा धर्मराजप्रीत्यर्थं यमतर्पणं करिष्ये। दक्षिणा
भिमुख उपविश्य उपवीती देवतीर्थेन तिलसहितेन जलेन स्विष्टिं स्विष्टिं यमाय २००
२०० नमः। इत्यर्घं तर्पयामीति त्रि तर्पयेत्। एवमुत्तरत्र युञ्जीत। यमं तर्पयामि। धर्मराजं तर्पयामि।
मृत्युं तर्पयामि। अन्तकं। वैवस्वतं। कालं। सर्वभूतक्षयं। औदुम्बरं। दध्नं। नीलं। परमेष्ठिनं। वृकोदरं। चि

शं। वित्रगुप्त॥१८ इतिपुनर्यमेनर्तपणं॥ अथभीष्मतर्पणं॥ स्नात्वा यम्यममसंकल्पस्यरसंविन
ष्टे॥ ततःभीष्मतर्पणंकरिष्य इतिसंकल्प्य निवीती जमु
ष्टे। ततःतर्पणं परमेश्वरप्रीत्यर्थं भीष्म तर्पणं करिष्य इतिसंकल्प्य निवीती
उरितपूयद्वारा परमेश्वरप्रीत्यर्थं भीष्मतर्पणंकरिष्य इतिसंकल्प्य निवीती॥
षिनीर्थेन तर्पयेत् वैयाघ्रपद्य गोत्राय सांकृत्यप्रवराय च। अपुत्राय ददाम्य
तज्जलं भीष्मायवर्मिणे॥ भीष्माय प्रदास्य तिलोदकं॥ भीष्मायनमः। भीष्मं
तर्पयामि॥ अथश्रवणाकर्म॥ ततः श्रावण्यां पौर्णमास्यां सूर्या नुपूर्वाह्ने ह
द्विश्राद्धे कृत्वा दिवेवनवं कन्दुर्यमेव सह तुषिः पुरशिखाग्नेः पूर्वे नवे शिकु
निदधाति। वैकैकतीदवीमपि निधायपुरोडाशाय त्रीहीनवं वदरं पात्रं
पुरोडाशाकपाले वसंपर यप्राच्यां दिशि सुचिदेशे वल्ल्य यंवपरिग्रहस्थामा
त्रायवधाना प्रत्नद्वये कृत्वा असंस्कृतेनाज्येन कपात्रस्थाभ्यनक्ति। अथास्त
मितेस्सूर्ये प्राणानायम्य तिथ्यादिकं स्मृत्वा ममपुत्रादीनां रोगनिवारणस्

मस्त पापयद्वाराश्रीपरमेश्वर प्रीत्यर्थं नित्यधिरूपश्रवणाकर्म करिष्य इति संकल्प
ल्प्य समिद्द्वयमादायास्मिन्कर्मणि ठक्का । देवतापरिग्रहार्थ[illegible]स्मिन्नन्वाहित
ेनो ब्रह्मर्षी आज्यनीनेत्यं नमुक्ता । अग्निर्वनुर्वीरंस्वरुद्रव्यणमोम्याव्यकन
पुरोडाशेन ऋग्निप्राशयेनमूर्जि देवता धान्याद्रव्येणमूर्घ्नेष्टिश्च ठक्तन
मित्यादि पूर्णपात्रनिधानांत कृत्वा पुरोडाशदेवतानांपंचानानि वापप्रोक्ष
णेत्त्रू● ष्णीं कृत्वा विघातादि पूर्ववत् । तंडुलानि द्विधाकृत्वा तत्र केनपृथक्
पुरोडाशेन मध्य चरु अपचेत् । पुरोडाशभागस्थपुंक्तिं विसिष्टी का कृष्णाजि ॥२०१॥
॥२०१॥ नेपत्र्या चरु पर्यकारयित्वा पूर्णपात्रोदकं स्रुवेण पिष्टीन्विनीय पूर्ववत्प्रस्ता
पिरद्भिः । परिप्लाव्य पिंडीकृत्य पूर्वमुपहितेन ककपालं द्वंनार रणेनोपो

[illegible]वरस्थाल्यांतैडुलानोप्यकुपालेपुरोडाशंनिधायाख्वशाप्रमार्ज्य
कूर्मोक्षतिकृत्वोंतनस्रुवेमर्थेमनोर्दक्षिणभागेस्थालीपानिधाया
ज्यनसहधानानांपर्यग्निकरणंकृत्वाज्योत्सरतोस्यतिधानास्विःप्रो
क्षआज्योद्वासनंकृत्वाआज्यस्टकुरुवस्रुंमार्जनंकृत्वापुरोडाशोप
रिस्थितमस्मादिरणोनोपोह्यु-वरेपुरोडाशात्रिरिघायोद्गुदास्यब
र्हिःमास्याचोत्तरपात्रींतरस्थितल्लोकिकाज्यंपुरोडाशंनिमज्जय्य
ततःस्वाहाकृत्वंतैकलाश्नुनयेयादिस्थितस्टपिःअस्रैवंवरंड्रुताअग्नये
यादिवनस्टणामगारयास्थित्विहृपाप्रधानवरहोमेवि०।अदक्षिण
पाणिसव्येनापस्पृश्यसव्येनोपस्तीर्यकृत्स्नंपुरोडाशमवदायसव्येनन

द्विरभिघार्य अच्युताय सोमाय स्वाहा इति मंत्रेण जुहोति। उपस्तरणाभि
ज्यनिरीक्षणमंत्रः। यांतु देवगणा इति विसर्जनं। अन्नहीनं क्रियाहीनं मंत्रही
नं क्रियाविद्विजाः। यजमानमदक्षिण्यो नास्ति यज्ञसमो रिपुः। गृहागारोन
२३७ रं द्राक्ष ब्राह्मणाश्च विद्वेषिनः। पूजिताः पूजयंत्येते निर्दहंत्यवमानिताः।। २३७
।।अथ तिथिनक्षत्राण्युच्यंते।। वर्धस्वदिन मेवारिका भो मार्कंडेयं तिक
पो ह्यि कानि।। ।। इति नवग्रहमखः समाप्तः।। अथ वर्षहस्त तिथिपूजा।।
शो २

॥ कन्याया विवाहकाले तु शुद्धिर्यदि न विद्यते। द्विजस्योपनये चैव शुद्धिं नैव च का
रयेत्। गुरुर्हि पंचसप्ताय नवस्थः शुभदः सदा। पूजया द्विस्त्रि षष्ठायो नार्काष्ठ
द्वि गतः शुभः। मासे षोडश दासं ख्याया: सौवर्णं कारयेद् गुरुं। अर्चा रूपं तदर्धं
वा यथाशक्त्या तु कारयेत्। प्राणानायम्य तिथ्यादिकं स्मृत्वा। अस्याः कन्यायाः
अमुकराशिस्थित गुरुजन्य सर्वारिष्ट निरासार्थं शुभ फल प्राप्त्यर्थं जीवपत्नी
प्राप्त्यर्थं अमुक गुण बृहस्पति पूजा होमं जाप्याभिषेकं कर्म करिष्ये। अस्य कु
मारस्य अमुकस्थान स्थित गुरुजन्य विरुद्ध फल निवृत्त्यायुरारोग्याद्यभिवृद्ध्य
र्थं विद्याप्राप्त्यर्थं गुरु पूजनं होमं वा स्याभिषेकं करिष्य इति संकल्प्य।
स्वस्ति वाचनं कृत्वोपलेपाद्यङ्गान्तं कृत्वा गुरुं पूजयेत्। तथा च॥ सौव
र्णं तु गुरुं कृत्वा पीतवस्त्रस्य कृतो। स्थितं। पंचामृतेनोक्तमंत्राणां स्नानं पूर्वं तु स्नापयेत्।

आवाहनं। बृहस्पतिइति मंत्रः ॥ ओं भगवन्बृहस्पते समस्तदेवताचार्यां
गिरसगोत्र सिंधुदेशेश्वर दीप्तस्वर्णसदृशांगदीप्ते चतुर्भुज दंडकमंडलुवरद
हस्तचवरदानांकित पीतांबरमाल्यानुलेपनपुष्परागमयाभरणरमणीयस
मस्तविद्याधिपतये नमस्ते सन्नह्य पीत ध्वजपताकोपशोभितेन पीताश्वरथवा
हनेन मेरुं प्रदक्षिणीकुर्वन्नागच्छ इन्द्रन्नाभ्यां सरूपस्नो तरदलमध्ये स्वर्णप्र
तिमायां हुदञ्चुरस्त्रे दीर्घचतुरस्र पीठे तिष्ठ मनुज्ञार्थं त्वामावाहयामि ॥ अ
थौषधयः। बृहस्पतिरिति मंत्रः ॥ ओं भगवन्बृ मदनपुमधुपुष्पाणि पत्रपाल
२३८ शासर्षपो। गुडूच्यपामार्गी विडंगी शंखिनी तथा। सहदेवी विष्णुक्रांताश्व २३८
श्री षध्यः शतावरी। कोष्ठमांसी हरिद्रे द्वे मुरा शैलेय चंदनं। वचा कचोर मुस्ता
स्यात् सर्वौषध्यः प्रकीर्तिताः। सर्वा सामला भानुः शनश्चलीप्र दासपते। या ३०

षष्ठीरितिमंत्रेण सर्वाः ॐमेविनिक्षिपेत्॥ सप्त्यादिकं सर्वमेवोक्तं नवग्रहमखे।
अथ सालामलिका सुकुंभं स्थापयेत्॥ तथाच॥ कुंभंतासंपरिन्यस्य हालिघ्रेणे
तिमंत्रः वातआवातुवितिमंत्रेण सप्तवायुंनियोजयेत्॥ वातआवातुवित्यस्य वा
तायनउलो वायुर्गायत्री॥ वायुंनियोजयेत्। समुद्रादूर्मिमंत्रेण सप्तसिंधुंनि
योजयेत्। समुद्रादूर्मिरित्यस्य वामदेवआपस्त्रिष्टुप्॥ सप्तसिंधुंनियो
जयेत्। स्योनापृथिवीतिमंत्रेण मृदः ॐमेविनिक्षिपेत्॥ स्योनामेधातिथि
रसौमिर्गायत्री॥ गोरोचनंपंचरत्नं पंचवृक्षत्वचस्तथा॥ नदीउभयतोयानांवा
कुंकाञ्चीपालमेव वा। रत्नत्वक्पल्लवा मंत्रा नवग्रहमखेउक्ताः॥ क्षिपेत्कुं
भमध्येतुततोहोमंसमाचरेत्॥ अश्वत्थसमिधोऽङ्गापायसंघृतसंयु
तां व्रीहियवतिलाज्यंच मंत्रेणच बृहस्पते। आकूतीनां शतं सायं होमं

ऊर्ध्वा घ यथाविधिः। ततो होमावसाने त्वमभिषेकं तु कारयेत्॥ शौनकोपि॥ दा
रपुत्रे समेतस्य अभिषेकं तु कारयेदिति॥ अथाभिषेकः। इ३ आसां नेता। इ
दमापः प्रवहत। अपाघमप किल्बिषमप कृत्यामपो रपः। अपामार्ग त्वम
स्मादप दुष्वप्न्यं सुव। एना वो अग्निं नमसा। स्वस्ति नो मिमीतामिति सप्त।
स्वस्तिदा विशस्पतिः। ~~एना वो अग्निं नमसा~~ अश्विनोर सनं रथं। अश्वा
वती सोमावती। यावती द्यावापृथिवी महित्वा यावच्च सप्त सिंधवो वितस्थुः।
तावंतमिंद्र ते ग्रहं सहोर्जा गृह्णाम्यस्तृतम्। इत्यष्ट मंत्राः। कूष्मांडैश्चाभिषेचये
२३९ त्। ते मंत्राः। यद्देवा देवहेलनं देवासश्चकृमा वयं। अग्निर्मा तस्मादेनसो वि २३९
श्वान्मुंचत्वंहसः। यदि दिवा यदि नक्तमेनांसि चकृमा वयं। वायुर्मा तस्मा
देनसो विश्वान्मुंचत्वंहसः। यदि जाग्रद्यदि स्वप्न एनांसि चकृमा वयं। सूर्यो

मा न स्मादेन सो॰। यद्ग्रामे यदरण्ये यत्सभायां यदिंद्रिये। यच्छूद्रे यदर्य्येनो
नश्चकृमा वयं। यदेकस्याधि कर्मणि तस्यावयंजनामसि। यदापो अघ्न्या इति व
रूणेति शपामहे तितो वरूण नो मुंच। यन्मे केशेषु दौर्भाग्यं सीमंते यच्च मूर्द्धनि।
ललाटे कर्णयोरक्ष्णो रापस्तद्घ्नंतु सर्वदा। सहस्राक्षं शतधारमृषिः पावमानं
कृतं। तेन त्वामभिषिंचामि पावमान्यः पुनंतु ते। भगं ते वरूणो राजा भगं सू
र्यो बृहस्पतिः। भगमिंद्रश्च वायुश्च भगा सप्तऋषयो विदुः। सुरास्त्वामभिषिं
चंतु ब्रह्मा विष्णु महेश्वरः। वासुदेव जगन्नाथस्तथा संकर्षणो विभुः। प्रद्युम्न
श्चानिरुद्धश्च भगं तु विजयाय ते। आखंडलोग्निर्भगवान्यमो वै निर्ऋ
तिस्तथा। वरूणः पवमानश्चैव धनाध्यक्षस्तथा शिवः। ब्रह्मणा सहितः शे
षो दिक्पालाः पांतु ते सदा। कीर्त्तिर्लक्ष्मी धृति मेधा तुष्टिः श्रद्धा क्रिया मतिः।

सुद्धिर्लज्जावपुः शान्तिः पुष्टिः कान्तिश्च मातरः। एतास्त्वामभिषिंचन्तु धर्मपत्न्यः
समाहिताः। आदित्यश्चंद्रमा भौमो बुध जीव सितार्कजाः ग्रहास्त्वामभिषिंचं
तु राहुकेतुसमन्विताः। देवदानवगंधर्वाः पिशाचोरगराक्षसाः। ऋषयो
मानवो गावो देवमातर एव वा देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां ग
णाः। अस्त्राणि सर्वशास्त्राणि राजानो वाहनानि च। औषधानि च रत्ना
नि कालस्यावयवाश्च ये। सरितः सागराः शैलास्तीर्थानि जलदा नदाः।
एतास्त्वामभिषिंचन्तु सर्वकामार्थसिद्धये। ततो गावस्त्रादिभिराचार्यं पूज
२५० येत्। तत्र पूजां थ ते प्रार्थना। नमस्ते गिरिजानाथ वाक्पते थ बृहस्पते। करुणेहैः २५०
पीड्यमाना मम तायभज स्वनः। जीवो बृहस्पतिः सूरी राचार्यो गुरुरंगिराः।
वाचस्पतिर्देवमंत्री शुभं कुर्यात्सदा नमः। मयाहृतेन त्वया मम बृहस्पतिप्री
त्या सकलमनोरथसिद्धये यत्कृतं बृहस्पतिपूजनं होमं चाभिषेकं च तत्

गोयसे यथावन्मयि प्रीतिप्रसिध्यर्थं इमां गां सुवर्णदक्षिणां सहितां बृ
हस्पतिप्रतिमां सुवर्णनिर्मितां षोडशोपचारैः पूजितां कलशावस्त्रादिसर्वोपस्क
रसहितां तुभ्यं संप्रददे॥ वज्रमौक्तिकवैडूर्यप्रवालमिंद्रनीलकं। पंचरत्नमिति प्रो
क्तं नारदेन महर्षिणा॥ पंचपल्लवा नवग्रहमखे उक्ताः॥ ॥इति बृहस्पतिपूजनं॥
॥ अथाहुतिप्रमाणं। सिद्धान्तशेखरे॥ कर्षप्रमाणमाज्यं स्यान्माक्षीरं चनसमं। तंदु
लाना मुष्टिमात्रं च पायसं प्रसृतैः समं। कर्षमात्राणि सर्वाणि भक्ष्याणि लाजा मु
ष्टिमिता मताः। अन्नं ग्राससमं ग्राह्यं शाकग्रासार्द्धमात्रकं। समर्थं नरे॥ ग्रासार्द्ध
चरुमानं स्याद्दिक्ष्वः पर्वादिभिः स्मृताः। एकैकं पत्रपुष्पाणि तथा प्रगं प्रकल्पयेत्।
कदलीफलनारंगफलान्येकैकशो विदुः। मातुलिंगफलं तु खंड फणसं दशधा ह
ते। अक्षधान्नारिकेलानि खंडितानि तु कुर्याः। त्रिधाहतं फलं बैल्वं कपित्थं खंडि
वि

तं त्रिधा तु वा रूक्फलं होमे चोद्दिष्टं त्रिधा। फलान्यप्यालयखंडानि समिधस्य
दैर्घ्यांगुलैः। दूर्वात्रयसमुद्दिष्टं गडूचीखंडमंगुलं। व्रीहीणां च यवानां च चानमाकु
निरिष्यते। यदुः पत्रिस्तिलानां तु न दर्ढं वा विधायते। फलानां त्रिधा नागंसा
कंदानामप्यमांत्राकः। इक्षुः पर्व प्रमाणः स्यात् गुल्ली छित्वयंलता। आदेवा
मात्राः समिधो व्रीहीणां मंजरी समाः। तिलसक्तु कणादीनां म्रगी मुद्रायुमा
नतः। पत्रपुष्पफलादीनां तु स्वमाना कृतिरिष्यते। वेदस्थो खंड कस्तूरी कुंकु
मागरुकर्दमाः। हरिमंथसमाः प्रोक्ता गुग्गुलु बदरी समाः। हरिमंथ क्षाण
२५२ कः। स्मृत्यंतरे। कर्ष मात्रं करीषं होमे क्षीरमात्रं पयः स्मृतः। उक्तानि पंचग २५२
व्यानि तत्समानि मनीषिभिः। न समं मधुदुग्धानां तत्समानमु दाहृतं। द
धि प्रसृति मात्रं स्यात् पाक्का जानुप्रमिता मताः। एषु क्वस्तत्समतासु सत्कृ

वोपि तथोदिताः। गुडपलार्द्धमानं स्याच्छर्करापि तथा स्मृता॥ व्रीहयोऽणु
ष्टिमात्रास्तु मुद्गामाषास्तथा यवाः। तंडुलास्तु स्तदर्धा निष्कोद्रवास्तु ष्टि
मिताः। गोधूमी रक्तकमलमाविहिता स्तु मानतः। तिलाः शर्वरमानास्तु:
सर्षपास्तत्प्रमाणतः। शुंठिप्रमाणं लवणं मरीचान्यपि विज्ञातिः। त्व
मार्णस्याज्जामठं चतस्रमं वंद्वदनं। काश्मीरकस्तूरियक्षकर्दमाः। द्राक्षा
वीज समाः प्रोक्ताः समुद्दिष्टा निपवर्णिः॥ ॥इत्याज्ञतिप्रमाणं॥ ॥
अथ जिह्वालक्षणं॥ सुवर्णा कनका रिक्ता ज्ञाप्ता चैव तु सुप्रभा। बहुरूपा
तिरिक्ता च सप्त जिह्वाश्च वीर्हिताः। सुवर्णा वारुणी जिह्वा मध्यमा कनका
स्मृता। रक्ता चैवा नैरा जिह्वा कृष्णा याम्या दिशि स्थिताः। सुप्रभा पूर्व
दिग्जिह्वा ह्यतिरिक्ता ग्निगोचरे। ईशाने बहुरूपा च जिह्वा स्थानान्यनुक्र

मातृ। विवाहे वारुणी जिह्वा मध्यमा यज्ञकर्मणि। उत्तरा वोपनयने दक्षि
णा पितृकर्मसु। आवीनास्वेका र्येषु आग्नेयी शांतिकर्मसु। ईशानी
योग्य कार्येषु एतद्धोमस्य लक्षणं। अग्निः प्रदक्षिणावर्तः कर्मदश्च शुभा
वहः॥ ॥इति जिह्वालक्षणं॥ अथ मुद्रालक्षणं॥ संग्रहे॥ होमे मुद्रात्र
यं प्रोक्तं मृगी हंसी च सूकरी। सूकरीकरसंकोचो वी हंसी मुक्तकनिष्ठिका।
कनिष्ठातर्जनीमुक्ता मृगी प्रोक्ता परिकीर्तिता। आभिचारिककृत्येषु सू
२७२ करी तु प्रशस्यते। शांतिके यज्ञकृत्येषु मृगी हंसी प्रशस्यते॥ इति मुद्राल २५२
क्षणं॥ अथाग्निवर्णाः॥ स्वर्णसिंदूरबालार्ककुंकुमाक्षौद्रसन्निभाः
सुवर्णरेतसो वर्णाः शोभनाः परिकीर्तिताः। प्रदक्षिणावर्त्तकपांसुवा।

न्नाभ्रविनाः शिखाः। शुभदा यजमानस्य राज्यस्यापि विशेषतः॥ ॥अथ
दीपविधिः॥ सूर्यास्तमान संदीप्यो यावत्सूर्योदयो भवेत्॥ तावत्सर्वः दीप
कः सदीप्य आयुरारोग्यपुष्टिदः॥ पूर्वं च दीपे पश्च वर्द्धन व याम्ये च दीपे
पश्च नाशनं वा प्रतीच्यां दीपे वक्षुधान्यवृद्धि रुदक्च दीपे वक्षु राज्य रक्षा।
एकदीपः सदा श्रेष्ठो द्वौ दीपौ धन वृद्धि दौ। त्रिदीपे हानि रोगौ च दारि
द्र्यं हीनदीपके। घृतेन दीपः संदीप्यो देव ब्राह्मण तृप्तिदः। अलाभे
तिलतैलेन सदा कुर्वीत वै द्विजः। औरूवर्व। न कृष्ण तैले न स्नेह दीपं प्रद
पयेत्। न कृपंति पितरस्तस्य यावद् चूभवे दिति। दीपप्रलोपिनं तु सोक
ष्माण्डे क्षेदितश्च्छि या। अचिरेण वकालेन वंशच्छेदो भविष्यति। तु खेवा
वैनवातेन यावच्छेषं प्रशाम्यति। विना दीपेन यो भुंक्ते ब्राह्मणो ज्ञानेदु

र्वीलाः। ग्रासे ग्रासे भोजनेच आज्ञाप्त्यं समाचरेत्॥ विप्राणां भोजनं मध्येय
दि दीपः प्रशाम्यति। पाणिभ्यां पात्रमादाय भास्करं मनसा स्मरेत्॥ पुनर्दी
पांतरं दृष्ट्वा शेषमन्नं तु भोजयेत्॥ पुनरन्नं न भोक्तव्यं तु क्षारायणं चरेत्।
दीपहीनं दर्शनाद्यं मध्ये तमसि मज्जति। तस्माद्दीपः सदा देयो यद्रूपमा
णेन वै पितृन्॥ दीपच्छायासनकाया कार्पासं दंतधावनं। अजाविरेणुसं
स्पर्शः शक्रस्यापि श्रियं हरेत्॥ दीपदो नाम्न तंतुच्छाया भर्तुरुपरि वेत्त्वते
त्॥ तद्रूपत्योर्दरिद्रत्वं यावज्जन्म भवे ध्रुवं। ज्योतिर्विरहिते पात्रं स्पृष्ट्वा वमेत्।
२५३ ॥ इति दीपविधिः॥ ॥ अथ स्नानविधिः॥ ईश्वरसंवादे॥ निंघस्थाने स्नु स २५३
निष्ठु गृहीत्वा घ्नं विवर्जयेत्॥ कुर्वीत यदि मूढात्मा रौरवं नरकं व्रजेत्॥ न
गेहे वाल्मीके चैव पाषाणे वाऽपल्वले। अंगणे द्वारदेशे तु मध्यभागे गृहस्य

वा। रिक्तभूमौ तथा लोष्ठ पार्श्वे चो छिद्रसन्निधौ। माता वा भगिनी वापि त
था चान्यस्त्रियो। पिता। पितृबांधवः सुहृच्चैव सन्निधौ शयनं त्यजेत्॥ देवद्वि
जगुरोर्वृद्धे न कुर्यात्सम्मुखं पदं। पूर्वशीर्षे भवेदायुर्दक्षिणे सुखसंपदः। प
श्चिमे प्रबला चिंता हानिमृत्युस्तथोत्तरे। स्वगृहे च शिरः पूर्वे श्वशुरस्य गृहे
तथा। प्रवासे पश्चिमे चैव वने कुर्यादुदक्शिरः। खट्वायां शयने नित्यमन्यखट्
वां विवर्जयेत्॥ तथा च स्मर्यते। आत्मशय्यासनं वस्त्रं जायापत्यं कमंडलुं।
आत्मनः शुचिरेतानि परेषां न समाचरेत्॥ न भार्यादर्शने अश्नीयान्नैकवा
सा हि संविशेत्॥ मातापित्रोस्तथा सव्ये शयनं कारयेद्बुधः। पादौ प्रक्षा
लयेत्पूर्वं पश्चाच्छय्यां समाविशेत्॥ मृदुशय्यास्थितः शेते तं रिक्तशय्या
विवर्जयेत्॥ उपानहौ वेणुदंडं मंत्रपात्रं तथैव च। तांबूलादीनि सर्वाणि

समीपे स्थापयेद्गृही। यानिकानि वपुष्याणि यत्किंचिद्गन्धलेपनं। अलक्ष्मी।
परिहारार्थं नित्यं कुरु युधिष्ठिर। अन्नमेदीपयः संगकरोतिमहाऊ यदि।
यावज्जन्म दरिद्रत्वं भवतेनात्र संशयः। आईपादावसानो या नारी प
तिसंगं समाचरेत्। आयुष्यं हरते भर्तुः सा नारी नरकं व्रजेत्। वक्तुकेन स
मं नारी भर्तुः संसर्गमाचरेत्। त्रिभिर्वर्षैश्च सध्यो वा विधवा भवति ध्रुवं।
तालपत्रमिल्लवर्णा दयिता मैथुनं चरेत्। पंचमे सप्तमे वर्षे वैधव्यं यद्यु
मिह जायते। पादलग्नं तन्तुश्चैव उच्छिष्टं ताडनं तथा। कोपरोषं वतुं खे २४४
वनिर्भर्त्सं संयोगेन दोषभाक्। अनुस्नानात्तु यो भार्यां सन्निधौ नोप
गच्छति। घोरायां भ्रूणहत्यायां पितृभिः सह गच्छति। अतुस्नानात्तु यो
नारी पतिं नैवोपविंदति। भुनीयवकीर्त्तं गोलीस्यात्कुकरीवपुनः पु

ऋतुकालोपगामी तु प्राप्नोति परमां गतिं। सत्कुलः प्रभवः पुत्रः पितृणां स्वर्ग
दो भवेत्। कुंकुमं चांजनं चैव नथाहारी न सिंदूरं। धौतवस्त्रं च तांबूलं सर्वदो
षभूषणावहं। नमस्कृत्य पदौ भर्तुः पश्चाच्छय्यां समाविशेत्। सा नारी सुखमा
प्नोति न भवेद्दुःखभागिनी। तांबूलेन सुखं प्राणं कुंकुमादि समर्चितं। प्रीतमा
ल्हादसंयुक्तं तत्वा योगं समाविशेत्। विनातांबूलवदनं नग्नामाचांतरोदनं।
दुर्मुखां वंध्यसंयुक्तां संयोगे च परित्यजेत्। वर्जयेद्गुर्विणीं वृद्धां अतिबा
लां रजस्वलां। गुर्विणी षण्मासात्तु परिवर्जयेत्। वर्जयेद्विधवां वंध्यां योनि
णीं च तपस्विनीं। व्रतस्थां च वर्जयेत्। रतिकालं विना स्त्रीभिः शयनं परिवर्ज
येत्। श्वासो ह्यासेन चारोति तनुपत्नकृ सर्वदा स्पृष्टवेत्। श्वाससंख्याप्रमाणो
न भर्तुरायुष्यं घातनं। तद्दोषपरिहारार्थं कनकाधारयेत् स्त्रियः। मणिमु

काफल्लं चैव तेन दोषाः व्यपोहति। मानसोल्कासो निद्रा समवेलायां तांबूलं वदना
त्यजेत्। पर्यंकात् मदालां कुंकुमपुष्पाणि मस्तके। अत एव स्मर्यते॥ हयकूटा
ख्या हि प्रोक्ता जीयषण्मत्री त्रिपुरीघवः। अल्पमैथुनकारी च शतवर्षाणि जीवति। ए
तस्मात्रिविषयाः कुतः॥ शाकुंतलापदेशो एक पश्चायनो नत्वा शा। एतद्वचनो
अभ्युच्छानमुपागते गृहपतेनोतज्ञापतो न घृतानत्पादार्पणं दृष्टिरासेन विधौ
नस्यापच यो स्वयं। स्फूर्तेन तच्छायी नतस्थमतो जल्पां त्वशय्यामिति ज्ञा
तोः पुत्रनिवेदिताः कुलवधूसिद्धान्तधर्मा अमी॥ म्लेन्पालये स्मशाने च
२८५ नैव रक्षे च तुष्पथे। न यक्षदेवायतने नग्नश्चैव स्वयं कुधः। कार्पासं पुस्त २८५
कं चैव तथा पुस्तकमेव च। पाषाणे काष्ठमित्यादि निरोधः परिवर्जयेत्। अ
गस्तिर्मो घवाम्रो चक्रुकुंदो महामुनिः। कपिलो मुनि रास्तीक पं चैतन्मु च

द्रायितः तास्तुभाव अशुचि स्यातां दंपती मैथुने गतौ। शयनादुत्थिता ना-
री शुचिः स्यादशुचिः पुमान्॥ दिवा निद्रां न कुर्वीत स्त्रियं चैव न सेवये-
त्। आयुःक्षयकरी निद्रा स्त्री चैव पुण्यनाशिनी। मनुः॥ आग्नेय्यां तु कृते
या निद्रा सा पुण्यक्षयकारिणी। तां करोति द्विजो मोहात् स्यादन्नं कुणकुः
यति। यः चेत् दक्षिणे कर्णे पुरीषे वा मवर्णके। धारयेद् ब्रह्मसूत्रं तु मै-
थुने ह्युपवीतवत्। कर्णग्रहणं ब्रह्मचारिविषयमिति विवेकः॥ ॥
इति शयनविधिः॥ अथ पिंडपितृयज्ञः॥ कारिका। एकाग्निरपि कु-
र्वीत पितृयज्ञं स उच्यते। अथ दर्शे परा ह्नेतु प्रज्वालोपासनं ततः। ए-
काग्नौ गृहि पिंडपितृयज्ञं कुर्यात्। स चामावास्यायां भवति तस्य प्रयो-
गोऽवदिश्यते। अपराह्ने औपासनाग्निं प्रज्वाल्य प्राग्दक्षिणाग्नेरके दी-

र्भैः परिस्तीर्येह सर्वकर्माणि प्राग्दक्षिणाग्रैर्वापि सुः। अथाग्नेरीशा
न्यां वायव्यां वा दर्भानास्तीर्य तेषु चरुस्थाल्यादिपात्राण्येकैकमासा
दयेत्। तथैव श्रौतेन कः॥ गडव्याख्यातपरिस्तीर्य दर्भैः प्राग्दक्षिणाग्रैर्वे न
अग्नेः प्रागुत्तरे इत्येषु स्यणुत्तरतोपि वा। प्राग्दक्षिणाग्रकान्स्तीर्य दर्भा
न्स्तेषु यथाक्रमं। चरुस्थालीमुपक्रम्य कमण्डल्ववसानकं। प्राग्दक्षिणा
न पात्राणि सादयेद्वकः क्रमादिति। नत्रपात्रक्रमः। स्रुवेडकः। चरुस्था
लीभ्रर्चे स्कोत्स्पयोलूखलमुसलस्रुवध्रुवहास्ताजिनसन्दंशाछिन्नेध्म
२७६ मेक्षणा कमण्डलूनिति। अस्यार्थः। श्रौतेनवच्नौ। चरुश्रपणार्थं स्थाली २
चरुस्थाली। [illegible] वोशाद्दस्पष्टादसं कुस्रुवं। एकेन प्रयत्नेन छिन्नाः कु
शाः सहदाः [illegible] नाः। एवं पात्राण्यासादयित्वा स्थालीमुपर्यय [illegible]

व्रीहिमच्छ कटं दक्षिणस्यां स्थापितां। तद्दक्षिणा देशात आरुह्य सर्वं स्था
लीं निधाय व्रीहिभिः प्रूरयित्वा। तां स्वर्णां भ्रूपं निमज्जयात्। ततः सर्वं स्था
लकटं पूर्वदक्षिण चत्वार्याजिने उलूखलं निधाय तत्र स्थालीगतान्व्रीहीं
न्यूक्षिप्य तानवत्यवहन्यात्। तत्रेदं सूत्रं। दक्षिणतो मारुह्य वरु स्था
ली व्रीहीणां पूर्णां निमज्जे त्परिश्रान्तां निदध्यात्कृष्णाजिन उलूखलं
अवेन रात्स्यपवहन्यादिति। अग्निसमीपे तिष्ठनी त्यग्निष्ठं शाकटं। प्र
याण काले वाग्नयो यत्र तिष्ठंतीति। तदग्निष्ठं दक्षिणत आरुह्य तत्र
पं स्थाली निधाय व्रीहीभि रापूरयेत्। तां पूर्णां निमज्जयात्। निमज्जेति
धीदृसः अल्पोपरितनात् उदिति ल दृश्याच्छूर्पं परिश्रीताक्षुव रेनिदध्या
त्। स्वप्सममन्यात्। अथ संहतपलीहतो तण्डुलान्स हस्त्रक्षाल्यपवेत्। अ

थ ये रूपाणि त्वाग्ने यी दिवि तां लुत्सुफं नीलाभ्रु चो दे वो स्थापयेत् । समस्तः ।
ये रूपाणि प्रतिमुं चमाना असुराः सन्तः स्वधया चरति । परापुरो निपु
रो ये भरंत्यग्निष्टांल्लोकात्प्रणुदात्व स्मात् । एषोऽग्नि मिति प्रणीतस्तेजः । एत
पूर्ववत्परिस्तीर्य स्माद वी गार्हपत्ये नाग्नि संधे नले स्वा आग्ने यी सं
स्थाउलि स्वतामध्वदेप स हो दो छिन्ने रव स्ती यं विलीना उसमनु
ष्टतं नवनीतं वा धृत्वा या मा सि चाग्ने दक्षिणतः ॐ सोषुनि दध्यात् ।
अथ दृश्वाग नि । नाज्येन अभि घारितं स्थाली पाकं हुद गुद्वास्य पुन
२६७ रभिघार्य पश्चिमदेवो आस्तीर्ण बर्हि षि निधाय अग्नेः पश्चिमदेवो २६७
अग्ने वाविरयतः । ॐ रात्री स्ती यंति चुवरं स्थापयन् इत्यर्थः । अ
र्वादि बर्हि वो दरवा स्तरण विनि युक्तत्वात् । अथा ज्ञानाभ्यंडने

सोऽपि बर्हिः [illegible]शिष्टं च अग्नेर्दक्षिणतो निधाय प्राचीनावीती त्रसीमिधाम
न्मा[illegible]याव दानसंपदामेक्षणेन चरूमवदाय तेनैव डुकु यान्। सोमाय
पितृमते स्वधा नम इत्यनेन मंत्रेण पुनरूपस्तरणादि कृत्वा अग्नये कव्य
वाहनाय स्वधा नम इति द्वितीयामाहुतिं जुहुयान्। स्वाहाकारेण वा होम :
स्यान्। तत्पक्षे। अग्नये कव्यवाहनायेति मंत्रैः। सर्वस्मात्पश्च्या सोमायेत्यादि
मंत्रः स्यात्। यज्ञोपवीती च भवेत्। एवमीग्रपदं स्वहय स्यात्। मेक्षणमग्नौ
प्रहरति प्राचीनावीती रेखायां पिंडदेशेषु पराचीनेन पाणिना पः कुंघं
तामितिनिर्निनीयात्रिः प्रा। दो दित्यर्थः॥ एतत्ते पितरः अमुकगोत्र देवदत्ता
र्मन्नवस्त्ररूप येचत्वा मंत्रा न्चिरोवस्तु श्राद्धार्याय पिंड स्वधा नम इति तत्र पिं
ड निदधाति। एवमितरा स्यां निदध्यात्। यदि च यागीजीवति तस्मै नि

ष्टण काले पूर्वीहक्कौले मन्त्रेण स्वाहाकारान्तेन पाणिना पिंडं जुहोति। अ
त्र पितर इति पिंडं बर्हिरग्रे स्वपाणिनिम्रजपात्र पितर इत्यनुमंत्र्य सव्यमुद
गन्त्वा त्वाचम्य यथाश्वासं प्राणानि यम्य पुनस्तथैवावृत्य अमीमदन्त इ
ति पुनरनुमंत्र्य यज्ञोपवीतं नाव रुद्धाय मवघ्राय हस्तं प्रक्षाल्य शेषान्नपात्रे
त्रे निक्षिप्य पिंडपात्रमद्भिः प्रक्षाल्य तज्जलेन प्रदक्षिणं वतिमादि पिंडं धुं धेतो
पितर इत्यादि मंत्रैर्निर्विवनं हत्वा पिंडत्रयमखिलं हत्वा पूर्वासादितमंड
नं दर्भतादायास्यं ज्ञायडपस्यनेय छित्वावत्तेन मंत्रेणा ॐ नमउ पऊप
स्य नय घांगुलप्रमाणाद दर्शादघान्। प्रजां हत्वा तथैव पिंडशेषान्नवि
कीर्य निधान्नमोव इत्युपस्थायोपविवेश। अथ पिंडान्नवाहयन्। परेत
न पितरः सोम्यासो गंभीरेभिः पथिभिः पूर्विणेभिः। दत्वायास्मभ्यं द्र

गेहभद्र रयिं वनः सर्व वीरं नियतेति। अथाग्नि समीपं गत्वाग्नेतन चेत्य
नेन यदंतरिक्षं पृथिवी मिति मंत्रेन त्स्वृ एवं जपेत्॥ यदंतरिक्षं पृथिवी
मुतद्यां यन्मातरं पितरं वा जिहिंसिम। अग्निर्मा नस्मादेनसो गार्हपत्यः प्र
मुंचतु करोतुमा मनेहसं। अथ वीरं मे धत्त पितर इति मध्य पिंडमाद
य आधत्तपितर इत्यनेन पत्नी प्राशयेत्॥ आधत्त पितरो गर्भं कुमारं
पुष्करस्रजं। यथायमरपा असत्॥ इतरौ पिंडौ अप्सु अग्नि प्राली ने
वा गवाश्वमिति क्षिपेत्॥ संग्रहे॥ पिंडस्य गोजाविप्रेभ्यो दद्याद्ग्नौ ज
ले पि वेति। गार्हपत्य पदस्येह लोपन्या यविदो विदुः। पाणि होमे आने
तपं चेत्यादिकं नास्त्येव। क्षणदानेर्यत श्राद्धं हत्वा पिंडपितृ यज्ञमि
माधानेतं हत्वा विप्रपाद प्रक्षालनादि श्राद्धमारभेत्॥ इति पत्न्याग्ने

पिंडपितृयज्ञः। अथ आज्ञापयोगि वचनं सं दर्भो लिख्यते॥ श्राद्धविघ्ने स
मुत्पन्ने मृतस्याविदिते दिने। एकादश्यां प्रकुर्वीत श्राद्धं दर्शे विशेष
तः। आपोशानकरे विप्र संकल्पं यः समाचरेत्। न स्वं भवति न श्राद्धं
पितृणां नोपतिष्ठते। जमदग्निः। स्नानं संध्यां जपं पत्न्यां पिंडप्राणं
तु दक्षिणां। आह्वानं स्वागतं चार्घ्यं विना च परिवेषणं। विसर्जनं
मभ्यस्य आशिषः प्रार्थनं तथा। विप्र दक्षिणं चैव स्वस्तिवा
चनं विना। पितृमज्ञेन्यत्र कर्तव्य प्राचीनावीतिना स्मृतेति। संग्र २५९
२५९ हे। संबंधस्य मं प्रयाजो जनामतनः परः। पश्चाद्रूपं विजानीया
न्मातृपाः सनातनः। हेमाद्रौ। प्राचीनावीतिना पित्र्यं सव्यां जानु
निपातिना। दक्षिणास्त्वेन कर्तव्यं मध्य दक्षिण तल्लिलेः। देवं वा

क्षिणादि: स्या त्याद ज्ञा न्च सम्म ई नि। शिरो सवामपादे षु वा मागादि षु
पि तृके। अन्याच्य दक्षिणं जानु प्राग्वो दग्वाग्र दक्षिणं। यज्ञोपवीती स्वाहेति
दैवे तु स्वधेत्ये ति। आश्वलायन संप्रदायिनामाग्ने यी दिक्षु स्व पि
तृकर्म भवनीति कारेणो त्नं। नारायणः। यत्किंचिद्दीयते श्राद्धे दे विती र्थे
न दद्ददे। पितृके पैकृती र्थेन सर्वत्रै ष विधिः स्मृतः। पितृणामानसं दद्या
द्वामपार्श्वे तथा सुधीः। दक्षिणे वै व देवानां सर्वदा श्राद्धकर्मणि। बौधा
यनः। देवानामृजवो दर्भा अच्छिन्नाग्रा अमूलकाः। समूलाः पितृका
र्येषु दक्षिणाग्रा द्विगुणकाः। युग्मत्वं दैविके कार्ये मयुग्मत्वं तु पैतृके।
आसनाद्युपचारेषु सर्वत्रे षु विधिः स्मृतः। नाचस्त्रा नरकस्थाश्च नानि

यो निगलाद्ययो। स्वपि हृन्नूयोषय त्येव श्राद्धं कुर्वन्समाहितः। शौनकः॥
क्षणावाहनसंकल्पो पिंडदानात्तदातयोः। पिंडोत्सर्जनकाले च तथैवा
र्जनकर्मणि। अक्षय्यासनपाद्येषु गंधाघाच्छादनेषु च। श्राद्धकर्मणि वै
250 तेषु गोत्रनामप्रकाशयेत्। अक्षय्यासनयोः षष्ठी द्वितीया वाहने त
था। अन्नदाने चतुर्थी स्याच्छेषाः संबुद्धयः स्मृताः। अथवा सर्वत्र च
तुर्थी प्रयोज्या। श्राद्धारंभेवसाने च पादशौचे च तथार्चने। विकरे पिंडदा
ने च कुर्यादाचमनं ह्नति। तेषु प्रथमा द्विः। गोदावर्यां गयायां च तथापे २५०
२५० तकपक्षके। तिथिवारदग्धयो दोषो नास्तीति मनुरब्रवीत्। वाक्यस
मुच्चये। अद्भिः प्रतालपनत्पात्रं प्रति पिंडं कुर्यद्वहु। हस्तावनेजनं कु

र्यां पिंडपात्रमघोमुखं। दत्तेवा प्यथवा दत्ते भूमौ यं निक्षिपे द्बलिः। तद्

न्नं नि[illegible]ष्ययोनिराशाः पितरो गताः। योगी याज्ञवल्क्यः। अमावास्यामस्

[illegible]वं न मन्त्रा[illegible]यतिरेकि यत्। स्वयं कर्तुं मशक्तश्चेत्कृतं शिष्येण कारयेत्।

[illegible] विपुलं स्यबंधानयहवार्तिनः। व्यस्तेष्वेव सर्वेषु श्राद्धं विशेषणा

कारयेत्। संग्रहे। महालये गया श्राद्धे प्रेतश्राद्धे नुमासिके। पिंड श्राद्ध

प्रयोगः स्यादन्यासमन्यत्र कीर्तयेत्। सर्वत्रोंकारमुच्चार्य श्राद्धमंत्रेषु नोच्चरेत्।

आर्षछंदांसि वै तद्वत् श्राद्धतर्पणकर्मणि। सर्वायासविनिर्मुक्तैः कामक्रो

धविवर्जितैः। भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा। मुञ्छादि पानि तै

सार्द्धं नव देवा निषिद्धवैः। आच्छादनं तु यो दद्या दहतं श्राद्धकर्मणि। आ

युः प्रज्ञास्यमैश्वर्यं रूपं बलमतेऽद्भुतं। नैमित्तिके यथाश्राद्धे नदद्यात्कृतवत्व
त्सरी। भ्रमती पितरस्तस्य दीनाननाश्चवत्सरं। गृहीणी चैव सुस्ना
ता श्राद्धपाकं समारभेत्। निःपन्नेषु च पाकेषु पुनः स्नानं समाचरेत्॥
नारायणः॥ मातापित्रो पृथक्कुर्यात् भेदमेकोद्दिष्टं वा वि चाविनू। दशावारकुला
चारास्तत्यक्त्वं विधिवन्नरैः। पितृव्यभ्रातृमातृणां ज्येष्ठानां पार्वणं स्मृतं।
एकोद्दिष्टं कनिष्ठानां दंपत्योः पार्वणामिथः। यजुषाः सामगाः पूर्वमध्ये २५१
२५१ जुहूं त्यथर्वणः। बह्वृचाः श्राद्धशेषेण वैश्वदेवं त्रिधामतः। अथश्राद्धकालः।
कुलपक्षाष्टकादर्शी वृद्धिरादित्यसंक्रमं। चंद्रसूर्यग्रहौ पाताः श्रा
द्धकालेव गजछविरिति। अथपार्थः॥ गजछाविद्युत्कूलक्षणो गुच्छायेतस्थः।

पक्षपक्षे इति सामान्योक्तेः इति मासं सर्वदा ह्यपक्षेप्यत्र हेमाद्रौ कर्त
व्यमित्यर्थः॥ मदनपारिजातके॥ ब्राह्मणं न परीक्षेत दैवे कर्मणि धर्मवित्
पित्र्ये कर्मणि संप्राप्ते परीक्षेत प्रयत्नतः॥ हेमाद्रौ। दक्षिणाप्रवणे देशे ती
र्थे देवा गृहेपि वा। स्वश्रमो तु नदीतीरे देवो वै शाकपाहते। विश्वामित्रः।
आछूकत्तीव सर्वैः सध्यापोपासनेहते। स्वः श्राद्धं च करिष्यामीत्यप
रोक्तो वरयेत्सूतान्। स्नूतवचनमुपलक्षणम्। पाराशरः। इत्युक्तमुपासं प
न्नो ब्राह्मणान् पूर्ववासरे। निमंत्रयीत तान् सम्यग् नियोगाख्यान् निपूर्वकं। का
त्यायनः॥ न विना ब्रह्मचर्येण ब्राह्मणाः श्राद्धकर्म मर्हति। यत्नीश्च ब्राह्मका
न्त्रिय तद्दिने तो निमंत्रयेत्। याज्ञवल्क्यः। एकैकं पंचवान्विजान्यादेवो
विनियोजयेत्। द्वौ दैवे पात्रादकपित्र्ये एकैकस्मान्नवेत्रयः। एवमेक

२५२

दृष्ट्वा ज्ञात्वा यथोक्ता येच पार्वणे। सर्वत्र देवपूर्वत्वात्प्रथमं दैवमेव तु यंते
क्रतुर्दक्षो वसुः सत्यः कामकालस्तथैव च। धूरिश्चलोचनश्चैव तथा चैव पु
रूरवाः। आद्रवश्च दशैते तु विश्वेदेवाः प्रकीर्तिताः। दर्शे हस्ता जिनं मंत्रा श्रु
तगा हविरग्नयः। अयातयामा विज्ञाया नियोज्याश्च पुनः पुनः। अहुतेपि
दानेतु ब्राह्मणो वमने यदि। पुनः पाकं तु कृत्वा च श्राद्धं कुर्यात्प्रयत्नतः।
नि ते बलिक्रियां कृत्वा पनपाकं तु सेवनाद्दातुः धर्मफलप्राप्तिस्सौत्रात्कालप्नुके
२५२ नुके लिखिषां संग्रहे। अविभक्ताः सुताः सर्वे एवं कुर्युः स्मृता हि वै। अवि २५२
भक्ताः पृथग्भावा स्वस्वार्जितधना ज्ञाताः। भ्रातरः कुर्वते श्राद्धं मातापि
त्रोः पृथक् पृथक्। श्राद्धे विवाहयज्ञे व दीक्षाया मागतेष्वै। गुरौ। लि

घृतांक्षालनं कुर्यान्निराशाः पितरो गताः। पादप्रक्षालनं प्रोक्तमुपविश्य यत्
सनेहि जानुनि तिष्ठतां क्षालनं कुर्यान्निराशाः पितरो गताः। तिष्ठन्प्रक्षा
लयेत्पादौ देवपित्र्ये च कर्मणि। देवानां त्वंन्नमस्कारांति कव्यं च पितरस्तथा।
अथ अर्घ्यो दकं स्नानं विप्रपादाभिषेचनं। आदित्याभिमुखः कुर्यात् द्विजश्च
दक्षिणे यति संध्या वदनमेव च। प्रातः संगव मध्याह्ने निसायाह्ने निविसं
ध्ययोः। आदित्याभिमुखः कुर्यात् द्विजपादाभिषेचनं। नांदीश्राद्धं विवा
हादौ ह्याद्रेप्यावसथेषु च। पूर्वाभिमुखः कुर्यात् द्विजपादाभिषेच
नं। पाद्यार्थं प्राङ्मुखो विप्रो गृहस्थः पश्चिमामुखः। विप्रस्य दक्षिणं
पादं वामे दद्यादुदङ्मुखः। भ्रात्रे समिन्धे पुत्राय स्वामिने मातुलाय च।
मित्राय गुरवे श्राद्धमेको द्दिष्टं न पार्वणे। यजमानस्य दासस्य भो क्ता।

सद्विजसत्तम। पुत्रकोषं त्यजेद्भूमौ वामभागे च पैतृकं। पात्रिहोमेव ये
दर्भाः पात्रेधौ चाधस्तात् निक्षिपेत्तु। पुनरग्नौ च तान्कृत्वा दहन्ति पितरस्तथा।
आदौ पिता तथा माता सापत्नजननी तथा। मातामहाः सपत्नीका आ
त्मपत्नी स्ततः परं। सुतभ्रातृपितृव्याश्च मातुलाश्च सभार्यकाः। दुहिता
च स्वसाः पोत्रादौहित्रो भागिनेयकाः। पितृस्वसा मातृस्वसाश्च श्व २५२
शुरो गुरुरुच्यते। एते स्युः पितरस्तीर्थे तर्पणे च महालये। तातांबात्रितयं स
२५३ पत्नजननी मातामहादित्रयं सस्त्रीस्त्रीतनयादिनाततजननी स्वभ्रात
रस्त्रीस्त्रयः। ताताम्बात्मभगिन्यपत्यधवयुग्जायापिता सद्गुरुश्शिष्या
प्ताः पितरो महालयविधौ तीर्थे तथा तर्पणे। पितरो मातरश्चैव स्त्री

निर्मानामहाः सह। पत्नीपुत्राश्च दुहिता पितृव्यभ्रातृमातुलाः। भगिनीन
सुताश्चैव मातुलानि दौहित्राश्च सपत्निकाः। पितृमातृस्वसारश्च प
त्नीपुत्रादिभिः सह। श्वसुरो गुरवस्तथा। अथ श्राद्धदिने वैश्वदेवकं नि
र्णयते। मत्स्यपुराणे। उल्लेषपात्रं तत्तिष्ठेद्यावद्विप्रा विसर्जिताः। वैश्व
देवं ततः कुर्यान्निवृत्ते पितृकर्मणीति। भविष्यपुराणे। श्राद्धं कृत्वा महाबा
हो ब्राह्मणांश्च विसृज्य च वैश्वदेवादिकं कर्म ततः कुर्यान्नराधिपेति।
चतुर्विंशतिमतेऽपि। शेषमन्नं तु पश्चात्तु वैश्वदेवं क्रियान्ततः। श्राद्धं हि शेष
शेषेण वैश्वदेवं समाचरेदिति। स्मृत्यन्तरेऽपि। यदा श्राद्धं पितृभ्यस्तु दा
तुमिच्छति मानवः। वैश्वदेवं ततः कुर्यान्निवृत्ते पितृकर्मणीति। कूर्मपुराणे।
निवृत्य प्रणिपत्यार्थं पर्युक्ष्यान्नं यमं भवन्। वैश्वदेवं तु कुर्वीत नैत्यकं च

ल्लिमेव वचेदिति। पैठीनसीरपि। श्राद्धं निवृत्य विधिवद्वैश्वदेवादिकं ततः।
कुर्याद्भिक्षां ततो दद्याद्धन्तकारादिकं तथेति। अत्रैके श्राद्धमध्येऽपि वैश्व
देवादिकं कार्यमिच्छंति शास्त्रांतरदर्शनात्। अत एव ब्रह्मांडपुराणे।
वैश्वदेवाहुतीरग्नावर्वाग्ब्राह्मणभोजनात्। जुहुयाद्भूतयज्ञादि श्रा
द्धं कृत्वा तु तत्स्मृतमिति। अर्वाग्ब्राह्मणभोजनादित्यनेन तोकरणानं
तरं वैश्वदेवाहुतीर्जुहुयादिति लब्धं भवति। श्राद्धं तु वा भूतयज्ञादिस्मृ २५४
तमित्यनेन न केवलं भूतयज्ञादिनैव श्राद्धांतकं इति वक्तव्यता प्रतीयते।
२५४ अपरे त्वनयोर्वचनयोर्व्यवस्थां कल्पयंति। अत एव भविष्यपुराणे। पितृन्संत
र्प्य विधिवद्बलिं दद्याद्विधानतः। वैश्वदेवं ततः कुर्यात्पश्चाद्ब्राह्मणकं ततो वै

लिप्सा ह्यर्थं उक्तमस्त्रैव। ये अग्निदग्धमंत्रेण भस्मोय निक्षिपेद्बुधः। आ
नीहितबलिर्वीरश्चाद्दुःकर्म जिमर्वदेति। अनेनाविकिरदानानंतरं हे
स्तमैश्वदेवादिकं कुर्यादित्युक्तं भवति। इत्येतच्छ्राद्धद्वयमध्ये वैश्वदे
वविधानं स्वस्वगृह्यानुसारेणात्र च्छाखिभिर्वोध्यं। अस्मत्कृत्यविव
रणे। च्छंतिकनारायणो विप्रविसर्जनानंतरं वैश्वदेवादिकं कार्यमित्यु
क्तो गृहबलिं कुर्यादिति धर्मोत्र व्यवस्थित इति। यन्मनुवाक्यमुदाहृ
तं तेनास्मच्छाखाऽनुसारिणां श्राद्धांत एव वैश्वदेवो भवतीति प्रतीयते।
तत्राहिताग्निनां श्राद्धात्पूर्वमेव वैश्वदेव इत्येवं विशेषो लौगाक्षिणो
क्तः। पक्षांतकर्म निर्वर्त्य वैश्वदेवं च साग्निकाः। पिंडयज्ञं ततः कुर्यात्त
तोन्वाहार्यकं बुध इति। पक्षांतं कर्म दर्शपूर्णमासयोः। सर्वाग्नेमन्वा

धानारब्धं तत्र हुत्वानन्तरं वैश्वदेवं हुत्वा पिंडपितृयज्ञान्वाहार्यकं च दर्श
श्राद्धं च कर्त्तव्यमिति। शालंकायनेनापि। श्राद्धात्प्रागेव कुर्वीत वैश्वदेवं स्वसा
ग्निकः। एकादशाहिकं मुक्त्वा तत्र ह्यन्ते विधीयते इति। तस्मादाहिता
ग्नीनां श्राद्धात्पूर्वमेव भवति। यत्तु षड्विंशन्मते। प्रतिवासरिको होमश्श्रा
द्धादौ क्रियते यदा। देवाहुत्वं न गच्छन्ति कव्यानि पितरस्तथा। इत्येतदाहि
ताग्निव्यतिरिक्तपरं द्रष्टव्यं। तस्मादितरेषां मते मध्ये वा यथाशास्त्रं भव
ति। तत्र येषां होममध्ये वैश्वदेवस्तन्मते वैश्वदेवार्थं पृथक्पाक एव भवति।
अतएव लौगाक्षिः। पित्रर्थं निर्वपेत्पाकं वैश्वदेवार्थमेव च। वैश्व २५५
२५५ देवं न पित्रर्थं न दद्याद्वैश्वदेविकमिति। अथ यमः। वैश्वदेवार्थमन्नं निष्पा
दितं वैश्वदेवार्थं न भवतीति। पैठीनसिरपि। पितृपाकात्समुद्धृत्य वैश्व

देवं करोतीति यः। आस्फुरं तद्भवे श्राद्धं पितॄणां नोपतिष्ठते। न चैवं वैश्वदेवे हि
श्रौ श्राद्धे वैश्वदेवकरणपक्षे तुल्य एवायं दोष इति। मैवं। यतो हि वैश्वदेवे न प-
रिकल्पितं हविस्तेन तं उद्दिश्य न त्यागो भवति तस्य वैश्व नित्यत्वे न्यायत्वादिति
पारि डानक कामादिभिः कृतत्वात्पित्रर्थं श्राद्धशेषेणापि वैश्वदेवं
युज्यते। अत एव चतुर्विंशतिमते। शेषमन्नमुपादाय ते वैश्वदेव क्रि-
यामतः। श्राद्धं कृत्वा श्राद्धशेषेण वैश्वदेवं समाचरेदिति। यदा तु भुक्तशे-
षाभावः स्यात्तदार्थं देवदेवत्यं पाकः। न चेह श्राद्धशेषेणैवेति नियमः क्व-
चिदस्ति तस्माच्छ्राद्धान्ते वैश्वदेवकरणपक्षे श्राद्धशेषेण वा पाकान्तरे-
ण वा वैश्वदेवो भवतीति प्रतीयते॥ स्मृतिसंग्रहे। श्राद्धावादौ क्षयेवाते
मध्ये डाकृतिपर्वणि। महालये च पिंडान्ते वैश्वदेवो विधीयते॥ ॥ इति श्रा

द्ध दिने वैश्वदेवनिर्णयः॥ कल्पतरौ। स्नाने दाने जपे होमे स्वाध्याये पितृक
र्मणि। सपवित्रौ सदर्भौ वा करौ कुर्वीत नान्यथेति। सुवर्णरजतादिकं वा
धार्यं। अयं निर्णयो विस्तरेण दर्शप्रकरणे उक्तः॥ ॥अथ काम्यश्राद्ध
दिने नित्यश्राद्धनिर्णयः। स्मार्ताः नित्यश्राद्धं न कुर्वीत प्रसंगात्तत्सिध्य
ति। श्राद्धांतरेण तेन तस्मिन्नित्यत्वात् तन्न लोपयेत्। अत एव स्मार्यते। दर्श
श्राद्धादिनिष्पत्तौ न नित्यस्य पृथक् क्रिया। तेनैव तस्य सिद्धिः स्यात्का
२५६ म्यो नित्याग्निहोत्रवत्॥ इति। पक्षश्राद्धे तु नित्यश्राद्धं कार्यमेव। न तु श्राद्ध २५६
द्वयं न कुर्वीत समाने हनि कुत्रचित् इति श्राद्धद्वयनिषेधः प्रतिप्रसवः क्रियते॥
कालादर्शे। नित्यस्य वाब्दिकस्य नित्यमासिकयोरपि। दर्शस्य वाब्दिकु
मस्य दर्श मासिकयोरपि। नित्यस्य वाब्दिकस्यापि दर्शकाब्दिकयोरपि।

सुगाघाहि कपोतयि ग्राम चा घाहिकयोरपि। उत्या हि कस्या चालभ्य योगेषु
विहित स्या द्वा संपाते देवता भेदा कुण्डद्वयस मावरेदिति। इतिनिरूपथा हु
निर्णयः॥ ॥अथ प्रवासविधिः॥ तत्रकारिका। अभयं वो भयं वोस्तु मन्त्रे
णो सन गृही। प्रवसंल्लुपतिष्ठेत ततो ग्रामान्तरं व्रजेत्। आगतश्च तदंकु
र्यान्मन्त्रश्चैतस्य स्वांगृहानीक्षेताथ नाहिताग्निर्गृहा मा बिभीतोर्व
स्यैवास्मास्वि प्रजायध्वं माव वो गोपतीरिषदिति प्रपद्येत गृहानहं
सुमनसः प्रपद्ये वीरघ्नो वीरवतः सुवीरान्। इरावतो हं तो इदं त्सरमाण।
स्तेन प्रहसुमनाः संविशानीति शिवं शग्मं वो योः शं योरिति त्रिरनुवीक्षमा
णो विहितमप्यलीकं नतत्वं हं शापयेत् पुर्विं शापयेत भयं वो भयं मेस्त्विति त्य
वोपतिष्ठेत प्रवासन्न त्वेत्याहरहरहयेति। अत एव कारिका। आगतस्त

लये दग्निमनेनैवोपतिष्ठते। गृहमेत्यादिमं ज्ञेण गृहे नीत्वेन वेदनः। गृ
हानहं स्मुमनस्सइत्यनेन नप्रपद्यते। जपेन्निवोद्वात्समा पास्त्व. शिवं शर्ममिति
तथा। प्रवासादेत्य पुत्रस्य परिगृह्याशिरस्ततः। अंगादंगादिति जपेन्मू
र्ध्नि त्रिरवघ्राय इति। प्रवासेदेत्य कर्तव्यं कुमार्या अप्यमंत्रकं। स्मा ग्रघ्रा
यातिवत्स्याणि इति पघानदृत्यथा। जिघ्रेत्याणि ततः का ला आह त्याग्नि
सत्तु कुसत्। प्रादुष्करणकालेतु कर्मन सुमुद्राहृतं। हुपतेपाणि समा
रोप नियमाः प्रागेवोक्ताः॥ इति प्रवासविधिः॥ अथ नांदीश्राद्धं मनुः।
२५७ नांदीश्राद्धं पिता कुर्यादाद्ये पाणिग्रहे बुधः। अत ऊर्ध्वं प्रकुर्वीत सर्वय २५७
मेव तु नांदिकं। मातृश्राद्धं तु पूर्वं स्यात् कर्मान्ते पैतृकं स्मृतं। ततो मातामह
हानां च वृद्धौ श्राद्धत्रयं स्मृतं। [illegible] [illegible]। पूर्वाह्ने मातृकं श्राद्धमपरा

कैषे तु कं स्मृतं। ततो मातामहानां च वृद्धौ श्राद्धत्रयं स्मृतं। वृद्ध मनुः। अन्त
रे भिन्नकालानां नान्दीश्राद्धत्रयं बुधः। सर्वेषां च वै कुर्वीत पूर्वाह्णे मातृ
पूर्वकं। कालनिर्णये॥ केवलास्तु नयेन्नृ श्राद्धावादौ तु मातरः। अन्वष्ट
कासु न च्छेयं च नान्ये तर्पणाः कदाचन। हेमाद्रौ। नान्दीमुखे विवाहे च प्रपिता
मह पूर्वकं। नाम संकीर्तयेद्विद्वानन्यत्र पितृपूर्वकं॥ अत्रैष क्रमः॥ स्त्रव
कारिकात्रयं तादृशि भिन्नकमोनोक्तः॥ अत्र विरोधपरिहारश्चिंत्यः॥ दि
पेन्ताया॥ मांगल्येषु गृहप्रवेशादिषोत्सर्गप्रतिष्ठामखवारम्भे सीमन्तसं
स्क्रियासु च यज्ञे नान्दीमुखाख्यान् पितृन्। गर्भाधानमुख्यक्रियासु तन्न
गर्भाधानमुख्यक्रियासु तनयापोद्वाहकार्यविधिष्वप्यर्थे स्ववपितृन्मितो

परिविर्धोऽस्मात्सुतः सृजयेदिति। मातृकुलां पितृप्रथमेऽह्नि कर्म दिवसेऽनुस्मा
त्पितृणाम यथैव वृद्धिश्राद्धविधिः॥ परेद्युर्भवेन्माता महानाम्नथ। सर्वेषु
विंदद्धीनवान्न यमिदं सर्वाह्णि मध्याह्नयोः पश्चाद्धेतद्रमवेनुसहपांना
२४८ दित्रकेस्यात्सुगे॥ परेद्युर्विकर्म दिनोत्तरदिने। प्रागे सर्वाह्णे॥ स्वपितृ
स्यः पिता दद्यात्सुतसंस्कारकर्मसु। गर्भाधानं पुंसवनं सीमन्तोन्नयन
जातकर्म नामकरणान्नप्राशने नोच्यते। याज्ञवल्क्यः॥ पुंसवन सीमन्तेन २५८
२५८ चौलोपनयनं विवाहेचानलाद्ये यत्र स्यादिति श्रौतकर्मसु। इदं श्राद्धं प्रकुर्वी
त द्विजो वृद्धिनिमित्तकं। पुंसवने च सीमन्ते नयो लोपनायने। गोदानेस्ना
नउद्वाहे नांदीश्राद्धं परादिने। अत्रजातकर्म निष्क्रमणसमावर्त
नानलाद्ये यत्र स्यादिति पूर्वदिन एवकार्यं। द्वादशाः क्रियमाणानामेव।

स्या-मात प्रजन। नांदीश्राद्धं भवेदेकं होममंत्राः पृथक् पृथक्॥३॥ यद्य
पि त्रादौ जीवति तदास्तु नः कथं नांदीश्राद्धं कुर्यादिति॥ तथा च वा पृच्छ्यौ वर्तीर्थे
सवास्तेतानेव पतिते तथा। एष्य एव पिता दद्यात्तेष्यो दद्यात्सुतस्ववत्
... स्मृतिः। उद्वाहे पुत्रजनने पित्रेष्ट्या सिवे स्मरेत्। तीर्थे ब्राह्मण आया
ते षडेव जीवतः पितुः। उद्वाहे द्विति द्वितीय विवाहे। अथ सूत्रं। युग्मान्व्य
ञ्जि मन्त्रे घिस्तुग्मानितरेषु प्रदक्षिणमुपचारो वेत्तिलार्थ इति। कारिका॥
प्राङ्मुखश्चोपवीती स्यादुपचारः प्रदक्षिणः। तिलकार्यं यवैः कुर्याद्युग्मा
नत्र निमन्त्रयेत्। श्राद्धकर्मा न मेखलास्तृदेकार्ये च सर्वदा। गंधादीनां द
नं द्विर्द्विः स्यात्। मूर्ववत्सर्वे॥ विशेषो बोलिरुव्यते। सम्नह॥ नांदीमहोत्स
वे दाने द्वादश्यां ओतकर्मस्व मूर्वामभिमुखः कुर्याद्विप्रपादाभिषेचने।

सत्यवसुसंज्ञिका नांदीमुखा विश्वेदेवा इदं वः पाद्यं स्वाहा नमः। इति यवोद
कं विप्रपादेषु द्विवारं क्षिपेत्।। अथ मातामही पितामही प्रपितामह्यः। नां
दीमुखा नांदीमुख्य इदं वः पाद्यं स्वाहा नमः। एवं पितृवर्गस्य च मातामह
वर्गस्य च प्रभुता भवंत्यादि क्षणे विशेषः।। अथ कारिका।। नांदीमुखाः
पितरः प्रीयतामिति मंत्रतः। पित्रर्थं उपविष्टेभ्यः सदर्घ्यं निवेदयेत्।। इम
मेव वदेन्मंत्रं पितामहपदान्वितं। तदर्थं मुपविष्टेभ्यः सदर्घ्यं निवेदये
त्। प्रपितामह संयुक्तं मंत्रमुक्त्वा तमेव तु। तदर्थं मुपविष्टेभ्यः सदर्घ्यं २५९
२५९ तमेव तु। अत्र पितृवर्गमातामहवर्गयोः। अनयोः स्मृतितो ज्ञा
तव्या तत्र प्रथमं मातृवर्गस्य देवं ततः पितृवर्गस्य प्रियतो मातामहवर्गस्य
चेति सिद्धं। अथार्घ्यदानं।। उक्तप्रकारेण देवानामर्घ्यं दद्यात्। विश्वे[illegible]

पवित्रं कृत्वा व्रीहि [illegible] तिलं अर्घ्य दान युग्मतः। यवोसि सोमदेवत्य इति मं
त्रावपावपः स्वधा या स्थानेषु स्यात्। स्वधा या स्थाने स्वाहा शब्दः स्वाहा
र्घ्यो इत्यर्घ्य निवेदनं। अन्यं पूर्ववत्। नान्दीमुखाः पितर इदं वो अर्घ्यं स्वा
हा नमः। अन्येषामेव द्विघात्। मंत्रं स्वाह स्यात्। मंत्रा वह्नि स्थ बालेण। गं
धादि दद्यात् पाणिहोमः। अग्नये कव्यवाहनाय स्वाहा नमः। सोमाय
पितृमते स्वाहा नमः इति वा क्रमः। अन्येषां पाणिषु दद्यात् अङ्गुल्या यत्
तद्भोजन पर्यन्तं पूर्ववद्भवेत्। मधुवाता इत्येव स्थाने कृपा समे गायता
न इति पंच वर्णा श्रावयेत्। अक्षन्नमी मदन्तेति वा अथ कारिका॥ संपन्नं
व व नांतं स्या दाचांते स्तु द्विजन्मसु। शौनकः। अन्नदोषणाविंशाय

मितिष्टच्छेद्द्विजानथातः श्लोकः सहभोक्तव्यमितिश्रुत्युक्तिपूर्वकं। अथपिं
डदानं॥ भविष्यपुराणे। पिंडनिर्वपणं कुर्यान्नवाकुर्यान्नराधिप। वृ
द्धिश्राद्धे महाबाहो कुलधर्मान्वेक्ष्य तु। तत्रयेषां पक्षे पिंडदानमस्ति
तत्पक्षानुसारेण पिंडविधानविधिरुच्यते। गृह्यसंग्रहे। अथावीं
नेष्वविक्षेषु पिंडान्दद्याद्यथाविधिः। बदरीफलसंमिश्रान्सान्कृत्वा
दक्षतीर्थतः। कात्यायनः। द्विजस्तु कृत्वा वायसमप गोमयेनोपलेपयेत्
यज्ञपात्रे गृह्यकाण्डोक्तान्नाम्नान्ततः परं। दक्षदाज्यं च कुर्वीत दक्षि
२६० णपतिसर्पिषा। दक्षदाज्येन संमिश्रान्कृत्वा शेषो हुतं भवेत्। एवं कृ ६०
त्वा क्रमयत्रेण ज्येष्ठो पिंडांस्तु निर्वपेत्। उक्तमपत्रेस्तु पार्वणेऽनग्नौ॥ अ

न्येतु नान्दीमुखेभ्यः पितृभ्यः स्वाहेत्येवं निष्पणतीति वृत्तिकारः॥ कारिकायां॥ अ
थानुमन्त्रणादिस्यान्नन्नेच्छति केचन॥ वह्न्याना न तपः॥ कृत्वा पिण्डान्कुर्वीत पिण्डपा
त्रमधोमुखमिति॥ अनन्तरं जयेत्तः॥ नोद्वासयेच्च — प्राणानुच्छिष्टान्नादिन्हस्याह
एतेषमन्त्रकीयथिपात्रं विवृणुयात्पितृन्॥ अन्यच्च दक्षिणादानेपि ह्यमवं विसर्जये
त्॥ कारिका॥ अथ संपन्नमन्त्रेण विप्राणां स्याद्विसर्जनमिति॥ गृह्यसंग्रहे॥ अमूल
रुजं वो दन्तः कर्तव्या इदं कर्मणि॥ संबंधनामरूपाणि वर्जनीयानि धीमता॥ तथा
वस्मृतिः॥ अनस्मद्वृद्धिश्राद्धे नामरूपाणामगोत्रिणं॥ अनात्मावातिलाद्येश्च नांदी
श्राद्धं वसव्यवत्॥ — नाथप्रथमा नेन वृद्धौ संकल्पमाचरेत्॥ न षष्ठ्याय दिवाकु
र्वन्ति तदोषो न जायते॥ अथ नान्दीमुखपितृलक्षणं॥ आचार्यः॥ माता पितामही
चैव तथैव प्रपितामही॥ पित्रादयस्त्रयश्चैव मातुः पित्रादयस्तथा॥ एते नान्दीमुखा ना
म्युआडेह मुदये द्विजेनिति॥ अत एव पितरो नांदीमुखश्राद्धा विज्ञिष्टाः पूजनीयाः

अतएवहेमाद्रौ॥ ऊर्ध्ववक्त्रास्तु येन त्रते नांदीमुखसंज्ञिताभवंति॥ येतु त्रहलुनाए
न्निहिताः। पितुः पितामहश्चैव तथैव प्रपितामहाः॥ त्रयोह्यश्रुमुखाएते पितरः संप्रकी
र्तिताः॥ ततः परे त्रयो — नांदीमुखास्त्विति॥ तन्महालयं प्रकृत्य पक्षश्राद्धं सा
र्वदिने पौर्णमास्यामेव तत्र जनीयन — रन्यत्र॥ तस्मान्नविरोधः॥ ॥इतिनां
दीश्राद्धविधानम्॥ ॥अथमृत्तिकास्नानं॥ ॥नदीतटेशुचौदेशेमृत्तिकामाहरे
त्॥ बलिच्छेत्यस्यास्त्रिःपृथिव्यनुष्टुप्॥ खनने॥ स्योनापृथिवीमेधातिथिर्भूमिर्गा
यत्री॥ मृत्तिकाग्रहणे॥ आयनेत्यस्यव्याऽऽस्तंबवसिष्ठोनुष्टुप्॥ दूर्वाग्रहणे॥ गायत्र्या
अस्याः हस्तौ निक्षिपेत्॥ ततस्नानं कृत्वा वमनं कारयेत्॥ प्राणायामपूर्वकसंकल्प
कृत्वा मृत्तिकां कुशोदकेनाभिषिंच्य॥ त्वानायमिंद्रमित्यस्य गर्ग इंद्रस्त्रिष्टुप्॥ आप
माथमधमन्त्रमास्त्ममित्यस्य यमो बृहती॥ तत्वायामिशुनःशेपोवरुणस्त्रिष्टुप्॥ आ
नोनिरुद्ध इत्यस्य वसिष्ठो वायुस्त्रिष्टुप्॥ वयंसोमेत्यस्य वधादयो [illegible] देवा गायत्री॥

एतैर्मंत्रैर्मृत्तिकामभिमंत्र्य ॥ तत्सूर्येत्यस्य काण्वः कुत्सः सूर्यस्त्रिष्टुप् ॥ मृत्तिकालेपने ॥
अघ्घकांते ॥ सहस्रशीर्षेत्यस्य नारायणः पुरुषोनुष्टुप् ॥ शिरस्यहृत्ते ले ॥ अग्नीं
तद्इत्यस्य काश्यपो विवृहा यक्ष्मनाशिन्यनुष्टुप् ॥ मुखे दूर्त्तने ॥ ग्रीवाभ्यस्तइति ग्रीवा
या मूध्याद्रिकं न देव ॥ अंगेत्यस्य स्तइति हृदये ॥ नाभ्यानाभिमित्यस्य त्रितः सोमः पव
नो गायत्री ॥ नाभौ ॥ त्वमिंद्रेत्यस्य देवजामयः इंद्रो गायत्री ॥ बाह्वोः ॥ सोमानमित्यस्य
कक्षीवान्ब्रह्मणस्पतिर्गायत्री ॥ ऊर्वोः ॥ बद्धानां पितेत्यस्य भारद्वाजः पाकनिष्ठ्युधिः त्रि
ष्टुप् ॥ पृष्ठदेशे ॥ उत्तुभ्यां तद्इत्यस्य काश्यपो विवृहा यक्ष्मनाशिन्यनुष्टुप् ॥ ऊर्वोः ॥
मेहनादिति जान्वोः ॥ अथ ध्याद्रिकं तद्देव ॥ एतावानस्येत्यस्य नारायणः पुरुषोनुष्टुप् ॥
पादयोः ॥ यस्य विश्वान्यशस्य इंद्रोनुष्टुप् ॥ हस्तयोः ॥ अंगादंगादित्यस्य काश्यपो विवृहा
यक्ष्मनाशिन्यनुष्टुप् ॥ सर्वांगोद्वर्त्तने विनियोगः ॥ ॥ इति श्रीरुद्रस्नानविधौ मृत्ति
कास्नानं समाप्तं ॥ ॥ अथ संध्याव्याख्यानं ॥ ॥ इदं विष्णुरिति मंत्रस्य मेधा

तिथि ऋषिः। विष्णुर्देवता। गायत्री छंदः। सकलदुरितोपशमनार्थं जपे विनियोगः।
ओं भूरिदं विष्णुः। इदं सर्वं विष्णुर्व्यापकः। विचक्रमे। आक्रमयामास॥ त्रेधापदं नि दधे
262 पृथिव्यामंतरिक्षे दिवि॥ त्रेधा निदधे निधत्ते॥ अथ पृथिव्यामग्निरूपेण॥ अंतरिक्षे वा
युरूपेण। दिवि सूर्यरूपेण। — —पदं स्थानं त्रेधा निधत्ते॥ एवं निहितं पदं अस्य विष्णोः
पांसुरे पांसुले धूलिसंते प्रदेशे। समूढं हम — व सम्यक् गुप्तमिव दृश्यते॥ एवं निहा
[illegible]तो विष्णुः स मां पातु। पृथिवीत्या कूर्मपृष्ठ ऋषिः। पृथिवी देवता। अनुष्टुप् छंदः
२६३ आसने विनियोगः। पृथिवि त्वया॥ हे पृथिवि। ते त्वया। इमा दयो लोका धृताः। सप्त २६२
त्वं कूर्मशेषरूपेण विष्णुना धृता। हे देवि दानादिगुणफलत्वं मां च धारय। चक्रप
द्मासनपवित्रं कुरु। अंगुष्ठाय गोविंदाय नमः। त० म० मध्य० हृषीकेशाय नमः
अनामिकायां क्रमाय० कनिष्ठिकायां विष्णवे नमः। करमध्ये वामनाय नमः।

ॐ भूः पादाभ्यां नमः। ॐ भुवः जानुभ्यां नमः। ॐ स्वः गुह्याय नमः। ॐ महः नाभि मंडलाय नमः। वरेण्यं शिरसे स्वाहा। भर्गो देवस्य शिखायै वषट्। धीमहि कवचाय हुं। धियो यो नो नेत्राभ्यां नमः। प्रचोदयात् अस्त्राय फट्। ॐ स्वाहा नमः। ॐ भूर्विश्वामित्रो अग्निर्गायत्री। ॐ भुवो जमदग्निर्वायुरुष्णिक्। ॐ स्वः भरद्वाजः सूर्योनुष्टुप्। ॐ महः गौतमो बृहस्पतिर्बृहती। ॐ जनो अत्रिर्वरुणः पङ्क्तिः। तपो वासिष्ठ इन्द्रस्त्रिष्टुप्। कश्यपो विश्वेदेवा जगती। तत्सवितुरित्यस्य विश्वामित्र ऋषिः। सविता देवता। गायत्री छंदः। गायत्र्याः शिरसे ब्रह्मा ऋषिः। अग्निर्वायुः सूर्यो देवताः। छंदो हीनः यजुर्यतः। प्राणायामे विनियोगः। ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ओं तत्सवितुर्वरेण्यं।०। ओं आपो ज्योतीरसो मृतं ब्रह्म भूर्भुवस्वरोम्॥ यः सविता स

षां प्राणानां यंतर्यामितया प्रेरयिता। स्वस्वकर्मसु। अथ सर्वस्य प्रसवि
तानो अस्माकं धियः कर्माणि। धी इति कर्मनाम। धर्मादिविषयबुद्धिर्वा।
प्रचोदयात्। प्रेरयति। तस्य सवितुर्देवस्य अभिमतदातुः सर्वस्य दीपयितुः
तेजोरूपस्य। घ. स्थानस्य वा विद्ववेदान्तप्रसिद्धाज्ञा [illegible] वाः पापभय
वर्जनात्। भर्गस्तेजो वयं धीमहि ध्यायाम। किं लक्षणं भर्गः। वरेण्यं
वरेणीयं स भजनीयं। ॐ सूर्यश्च० सूर्यः अहरभिमानी देवता। मन्यु
पतयः ब्रह्मविष्णुरुद्राः। तदधीनत्वात्। अस्य जगतः एतद्देवताः। मा
मन्युपतयः क्रोधाग्निजनितेभ्यः पापेभ्यो रक्षतां। यदह्ना रात्रि २६३
पत्ताद्दिने न कालेन हेतुना। मनसा परद्रोहचिंतनेन वादिना। वाचा पर
परवादादासं बाहुभ्यां पादिकयाहत्याभ्यां आत्मपरताडनादि। पद्भ्यां

रञं तुना मादि। उदरेण अभक्षणादि। त्रिभ्यामेद्रेण निषिद्धकालस्त्री सेवना
दि। एतद्वारिकपापराशि पलक्षित: कालएव लंपटु। विनाशायतु पातिंच
मयि पूर्वजन्मनि दुष्कृतात्मना कर्मण: आपघमरितत्सद्व्यवलंपटु। इ
द महं यदुरकंपिबामिनतू मां अमृत यो नौ अथित्वाग्निनिस्थाने सूर्यञो
तिषि अमृतस्वरूपिणी आत्मानं जुहोमि॥ ॥ आप: पुनंतु। अग्निश्च मा
व्याख्यान्सर्वत्र। अग्निरिति॥ अथ ध्यानं। ॐ आपोहि। व्याख्यानं।
हे आप: यूयंहिस्थितंनोस्माकं। मयोभुव:। - -वयि स:। नवथ।
म यइति सुख। नाम। तामुपन: अस्मान्। ऊर्जे अन्नायबलायवा।
ऊर्जित्वं नस्माम। दधातन। धत्त। महेमहतेरणाय। रमणीयाय। दाशाय
वा। चक्षसे। दर्शनाय।१। योव: हे आप: युष्माकं य: शिवत:। अतिशये

न स्मस्खचारी स्वस्ति। तस्या द्विती याथे षष्ठी तादर्थ्ये वा। रसस्य। न रसं न

अस्मान्। मनुष्यो लोके भाजयत। सेवयत। इह। काः उशतीः उशन्त्यः

पुत्रं कामयमाना मातरः न च ... तां -- नं पुत्रं स्तन्यरसं भाजयन्ति

264 तद्वत्॥२॥ तस्मा अरं। हे आपः वयं तस्मै रसाय। तं रसं। अरं पर्याप्तः। गमा

म। आप्नवाम। तस्य रसस्य। क्षयाय निवासाय। जिन्वथ। प्रीणयथ। च

जनयतनः। अस्मान् जनयथ उत्पादयथ॥३॥ शंनो॥०॥ इमा आपो देवी

देव्यः। अभिमतदा अस्माकं शं सुखं। अभिष्टये। अभिमुखत्वेन सुखं प्राप्तये

पीतये पानाय भवन्तु। अपि च शं रोगाणां शमनाय। भयानां पृथक्करणं २६४

यथा भवति तथा। नो अस्माकं। अभिमुखत्वेन स्रवन्तु। अभिषिञ्चन्तु॥४॥

ईशाना॥०॥ या आपः। वार्याणां वाञ्छनीयानां सम्भजनीयानां प...॥

ईशानाः ईश्वर्यः चर्षणीनां मनुष्याणां क्षयन्तीः। निवासयित्र्यः। ता आ
पः भेषजं अहं आयामि। कस्मात्। इतो अस्मात्॥५॥ अप्सु मे॥ सोमो
श्रीः
देवता मे मह्यं अप्सु उदक मध्ये विश्वानि भेषजा। भेषजान्यौषधयो नि अ
ब्रवीत्। कथयामास। च अन्यवत्। विश्वशंभुवं। सर्वस्य सुख भावयि
तारं। अग्निं। अंगवद्दिगुणगुप्तं। अब्रवीत्॥६॥ आपः पृणीतः। हे अ
प मम तच्चे शरीराय। वरूथं भोग च निद्रा निवारकं। कवचमनं भेष
जं औषधं तं रससारं। पृणात पूरयत। अन्यत्। ज्योक्चिरं तरं। सूर्य
दशोद्दृष्टं सूर्ये दर्शनाय। यच्छरीरं प्रियपारवार्थं पर्वीक रसं पूरयत॥७॥
इदमापः॥ हे आपः मयि इदं पस्याहतो दुरपतां नं पापं वहत। प्र
--अन्यत्र नडय। च अन्यत्। मया हि यस्सूर्यं वज्जन्मनि विरुद्धाहता

——णः। आपचमानं यत्किं मयि दुरितं दुःखेन ईयते प्राप्यते इति।
—रेतं कं सर्वं तदपि प्रवहत। वा अन्यत्। अहं अभिद्रोह। अभिद्रु-
ह्येन द्रोहं करोमि। वा अन्यत्। यदहं स्वयं दुःसन्द्रोपशेपे उत
अपिवा।। अनृतवचस्मि। तद्द्रोहादि सर्वं पापं प्रवहत। ८।। आपो।०।।
हे आपः अद्य अहं भवत्प्रसादात् दैन्यचारिषः संध्यादीनि कर्माणि
अनुचराभिवन्दोमि। यतो भवद्रसेन स्वयं समगस्महि संगता। अग्ने
मह अग्ने अयोज्ञातनस्वां पयस्वान्। उदकवान्। आगहि। आगच्छ २६५
अग्नो गत्य। तं मा मां वर्चसा ब्रह्मवर्चस्वेन। संसृज। सं योज्य।। ९।। स-
कृषी।०। अहं आपो देवीः अवसेरक्षणाय तर्पणाय आह्वे।
कृपामा विंशत् क्षणाः त दपसः सकृषीस्त नत्कमर्णि प्रतिप्रतिक्र

वती। दिवानक्तं च अहोरात्रं तिसृवती। वदेण्पत्रान्तः सभाजनीय कमसु
क्तः। ऋतं च सत्यं चा०। पुरा ब्रह्मणा सृष्ट्यर्थं ज - - - त्रा अभितप्तात्। तप
सः अधि उपरि। ऋतं मानसं यथार्थसंकल्पं। सत्यं वाचिकं। यथार्थभा
षणं। - - - स्या अन्य द्रव्यास्त्रियमधर्मं ज्ञानं सन्धीयते। सूर्व पुराणोस
ि तो वेदो जायत। ततोनपरं - अरात्री अजायत ततः समुद्रो अर्णवः।
समुद्रादर्णवादधि अर्णवस्तत्स्समुद्रादुपरि संवत्सरः। लवन्घादि सं
वत्सरः। अजायतः। कालो जायत अहोरात्राणि विदधत्। कुर्वन्। मिष
तः स्पर्द्धमानस्य विश्वस्य सर्वस्य वशी सर्वस्येति - नो धाता यथा पूर्वं सृ
यो यच चन्द्रमसाव कल्पयत् च अन्यत्। दिवं पृथिवीं अन्तरिक्षं। अथो
स्वः। सर्वस्य - कया आकल्पयत्। ॐ भूः ॐ भुवः ॐ स्वः। ॐ महः

ॐ जनः ॐ तपः। ॐ सत्यं। आपः पंचतिष्ठतानि गुहायां पुरुषोत्तमः। हे
आपः सुषुम्णायां निषिक्तायां सुष्टम्भ। नमो दीप्तानि पुरुषोत्तमः। परमात्मो
प्ततानि गुहायां हृदरूपे संस्रोतानिः पापानि हत्वा पश्यति परिपक्वानि प
रिपक्वबुद्धिनि परिपक्वज्ञानानि नो मोहाय न येन करोति। यः सद्गुरुः
अस्मान् पित्थाविधान्वा करोतु। हे पुरुषोत्तम त्वं यज्ञः। त्वं ब्रह्म त्वं रुद्रः
विष्णुस्त्वं वषट्कारः। आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरो॥ एतत्सर्वं
आपएव। गायत्र्या सूर्याञ्जलिं दद्यात्। दीपः। हंसवत्यां वा। ३॥ उदुत्यमिति ... २६६
द्वाविंशे पुरस्तद् बृहत्या।०। उदुत्यं। चरन्क्रा॥ केतवः। प्रकाशकाः किरणाः त्यं।
वदे वेदानष्ट सिद्धं सूर्यं उद्वहसि उर्ध्वमेव प्रापयसि। किंलक्षणं सूर्यं...

तवेदसं जातानि भूतानि वेत्तीति जातवेदाः अथ या जातानि एनं विदुरिति जातवेदाः। जातवेदो धनमस्येति जातवेदाः अथवा जातविद्यो वा जातप्रज्ञा वेति। जातवेदानं जातवेदसं। देवं अग्निं नदातारं दीपयितारं वा। किमर्थं वि श्वाय दृशे। सर्वस्मै दर्शनाय। ५। अपत्ये०त्यक्तु। विश्वचक्षसे विश्वदर्शनाय सूर्याय अहं स्तुतिं करोमि। यस्मिन् सूर्ये उदिते नक्षत्रे पुनः सत्त्वानि अहोभिः सह अपयन्ति। नश्यन्ति। केवलाः एव यथा तथा। तेता यव न त स्कराः प्रसिद्धाश्चौरा नश्यंति तद्वदाराः। अदृश्रमस्या०। अस्य सूर्यस्य केतवः। प्रज्ञापकाः रश्मयः किरणाः। जनान् अनु जनं नानु जति। द्य हुग विशेषण अदृश्यं दृश्यन्ते केतवः उपासकानां पापस्य नाशं तो

अग्नयःकिं वा। यथा दीप्यमाना अग्नयः सर्वे दृश्यंते॥३॥ तरणिः। ०। हे सू
र्य त्वं विश्वदर्शतः सर्वदर्शनीयः तरणिः। उपासकानां पापेभ्यस्तारयि
ता सन् ज्योतिष्कृदसि ज्योतिषां कर्त्तासि अथवा नक्षत्रादीनां प्रकाशकोसि
विश्वं सर्वं दीप्यनं रोचनं यथा भवति तथा आभासि सम्यक् प्रकाशसे
॥४॥ प्रत्यङ्। हे सूर्य देवानां विशः प्रजाः प्रत्यङ्ङुदेषि सन्मुखः सन्नु
दयं करोषि। मानुषान् प्रत्यङ्ङुदेषि। सन्मुखः सन्नुदयं विश्वं स्वर्द्दृशे स्व
र्गं दर्शनाय॥ विश्वं प्रत्यङ् सर्वमभिमुखः सन्नुदेषि॥५॥ वर्ग २॥ येनापा
वक। ०। हे पावक रुद्र पवने शोधक हे वरुण अनिष्टनिवारक सू
र्य येन चक्षसा दीप्तेन तां ईदृशा जनान् मनुष्यान्। भुरण्यंतं गच्छंतीं र
क्षिमसमूहं पश्यसि। तत्प्रकाशं वयं प्रणमामः॥६॥ विद्यामेषि। ०। हे सूर्य त्वं द्यां

त्वेपि घलोकं विशेषेण गच्छसि। पृथुविस्तीर्णं रजः अंतरिक्षमयो
ति वा। त्वेपि किं कुर्वाणः अहुभिः रात्रिभिः सह अहानि अहानि। — मा
नः निर्माणयन्। पुनः किं कुर्व जन्मनिजातानि भूतानि पश्यन्। ७। सप्तत्वा
हे सूर्य हे देव हे विचरण विशेषेण दृष्टः। सप्तहारतः। हरिद्वर्ण अश्वाः त्वां
त्वां रथे वहंति। अथवा सप्त सपर्णाः शीलाः हरित उ करणास्वमयः
शीरथे रहण शीले नमनशील मंडले त्वां वहंति प्रेषयंति। किंलक्ष
णं त्वां। शोचिष्केशं तेजोज्वालाभ्यां धीकरणोपेतं॥ ८॥ अयुक्तसप्त। सूर्यः
सर्पः सह सवर्णेन शीलाः शुंध्युवः। शोधकाः शुभ्राधार स्वमयः। अयु
क्तयुक्तं किंलक्षणः स्वमयः रथस्य रहणस्वभावस्या गमन शीलस्य मेड
स्वानस्य इतिछांदसालिंगव्यत्ययः। नतारस्विभिः स्वयुक्तिभिः। तैः स्वयं

योजन सहस्रे: सूर्य। यासि त्वयस्त्वम ॥९॥ उद्वयं० वयं ज्योतिः सौरतेज
तमसः अंधकारादुत्तरं। उत्तरं परिपश्यन्तः उत्तमम्। ऊर्ध्वं प्राप्ता देवत्रा
देवेषु मध्ये देवं दानादिगुणयुक्तं सूर्यं। उत्तमं ज्योतिः। परब्रह्माख्यं अ
गन्मागमवाम ॥१०॥ उद्यन्न० हे मित्रमहः प्रमीयते: परपदं। प्राणसमर्थ
स्तेजोयुक्तः सूर्य अद्यास्मिन् दिवसे उद्यन्। उत्तरं दिवं आरोहयन्। मम
हृद्रोगं नाशय। च अन्यत्। हरिमाणं। हरिव्याधिः तं नाशय ॥११॥ शुकेषु
मे० हे सूर्य त्वत्प्रसादात् मम हरिमाणं। नीलवर्णं व्याधिं शुकेषु पक्षि
षु रोपणाकासु। सारिकासु। दध्मसि। वयं दध्मः। आरोपयामः। अथो हा २६८
रिद्रवेषु। हरिद्रवर्णवृक्षेषु मम हरिमाणं सर्वान् व्याधिं वयं निदध्मसि।
निदध्मः। निक्षेपयेन्नतु यामः ॥१२॥ उदगादयं० अयमादित्य अदितेः पु

पुत्रः सूर्यः विश्वेन सहसा। सर्वेण बलेन सह उदगात्। उदयं प्राप्तः [illegible]
द्विषन्तं हेतुभूतं अस्माच्च रन्धयन् वशीकुर्वन्। अहमस्य प्रियासः
तो द्विषते द्विषद्वरेत मा ते रधं नेष्यन्ति वशगमनम् एवं वशगच्छय॥१३
व्याख्यानो विदद्वेदा सिद्धं वक्ष्यः। प्रकाशकं वेदहितं। देवानां हितकाः
उज्वलं। सोदितेषः उच्चरन्। उदगच्छन् वयं श्रातो। अविकलेन्द्रियाः स[illegible]
वन्। इत्याशरदः शातं जीवेम शतं॥१४॥ सविता पश्चातात्। सविता सर्वार्थ प्रस्ता
विता। इत्यधः न अस्माकं पश्चात्। सविता नो अस्माकं पुरस्तात्। सविता अस्माकं
पुरस्तात्। सविता अस्माकं अधरात्। सविता अस्माकं सर्वस्मिन्नदेशे सविता
न वतु इत्यर्थः। नो अस्माकं सविता सर्वतातिं सर्वार्थानां विस्तारं सु[illegible]
तु। सविता देवः नो अस्माकं दीर्घमायुः॥ सविता ददातु॥ इति संध्यावन्दनव्याख्या
॥इति श्रीमहोपाध्याय स[illegible]भट्ट विरचितायां [illegible] समाप्तम्॥ शुभं [illegible]

...वेश्मा॥ चतुर्थान्य संवत्सरे तु द्रग पन्ने पा[illegible] [illegible] नवम॥
गो [illegible] ज्ञान [illegible] मिथुन [illegible] दिने [illegible] मानो [illegible] लारिकं [illegible]
[illegible] देवल वाडोग्रामे [illegible] इदं पुस्तकं संपूर्णं॥ ॥श्रीः॥

॥श्रीः॥ श्रीः॥ श्रीः॥



॥श्रीः॥ ॥श्रीः॥



॥श्रीः॥ ॥श्रीः॥

श्रीः॥ कुसुमती ॥श्रीः॥

५००